Downloaded from https:// www.studiestoday.com

# सलिला

## संस्कृत

### कक्षा – 9

**2018–19**

राज्य शैक्षिक अनुसंधान और प्रशिक्षण परिषद् छत्तीसगढ़, रायपुर

निःशुल्क वितरण हेतु

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रकाशन वर्ष : 2018

© संचालक, एस.सी.ई.आर.टी. छत्तीसगढ़, रायपुर

मार्गदर्शक : डॉ. पूर्वा भारद्वाज, दिल्ली, डॉ. रमाकांत अग्निहोत्री, दिल्ली

सहयोग : त्रिपुरारि कुमार ठाकुर

समन्वयक : डॉ. विद्यावती चन्द्राकर, एस.सी.ई.आर.टी. छ.ग.

विषय समन्वयक : बी.पी. तिवारी, सहायक प्राध्यापक, एस.सी.ई.आर.टी. छ.ग.

लेखन समूह : बी.पी. तिवारी, ललित कुमार शर्मा, स्वरूपनारायण मिश्र,
योगेश्वर उपाध्याय, रतिराम पटेल, पुरुषोत्तम देशमुख

चित्रांकन : राजेंद्र ठाकुर

ले आउट : रेखराज चौरागड़े, सुरेश कुमार साहू

प्रकाशक

राज्य शैक्षिक अनुसंधान और प्रशिक्षण परिषद् छत्तीसगढ़

मुद्रक

छत्तीसगढ़ पाठ्यपुस्तक निगम, रायपुर

मुद्रणालय

..............................................................................

**मुद्रित पुस्तकों की संख्या –** ........................

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# आमुख

माध्यमिक स्तर पर संस्कृत शिक्षण का मुख्य उद्देश्य छात्रों में संस्कृत भाषा के प्रति अनुराग उत्पन्न करना है। संस्कृत शिक्षण के माध्यम से छात्रों में सामाजिक, सांस्कृतिक चेतना व मानवीय मूल्यों का सतत विकास करना है।

राष्ट्रीय पाठ्यचर्या 2005 के अनुरूप छात्रों के सर्वांगीण विकास को ध्यान में रखते हुए प्रस्तुत पाठ्यपुस्तक में ज्ञान, बोध, अनुप्रयोग एवं विभिन्न कौशलों के विकास पर बल दिया गया है। नवीन पाठ्यपुस्तक में छत्तीसगढ़ प्रदेश के वनों, छत्तीसगढ़ की विभूतियों, पौराणिक एवं अर्वाचीन कथाओं, विशेष आवश्यकता वाले बच्चों के लिए ब्रेललिपि और पर्यावरण आदि से संबंधित पाठों का समावेश किया गया है, जैसे–छत्तीसगढस्य वनानि, श्रीगहिरागुरुः, ब्रेललिपिः आदि। पाठों में सरल संस्कृत अभ्यास प्रश्न व गतिविधियों को अधिकाधिक महत्त्व दिया गया है। छात्र संस्कृत को व्यवहारगत बनाकर संस्कृत में वार्तालाप कर सकें, ऐसा प्रयास किया गया है।

इस पाठ्यपुस्तक के निर्माण में राष्ट्रीय स्तर के महत्त्वपूर्ण शिक्षा मंडलों की पाठ्यपुस्तकों का सहयोग व मार्गदर्शन लिया गया है।

इस पाठ्य पुस्तक को स्वरूप प्रदान करने में जिन विशेषज्ञों की सहभागिता रही है, परिषद् उनके प्रति आभार प्रकट करती है। निश्चय ही यह पुस्तक छात्रोपयोगी सिद्ध होगी। नवीन पुस्तक को और अधिक उपयोगी बनाने में विज्ञजनों के बहुमूल्य सुझावों का सदैव स्वागत रहेगा।

**संचालक**
राज्य शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
छत्तीसगढ़, रायपुर

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# भूमिका

भाषाई इतिहास की दृष्टि से संस्कृत का इतिहास अत्यंत प्राचीन है – हजारों वर्षों का। संस्कृत यूरेशिया यानी यूरोप और एशिया भूखंड के भारोपीय भाषा परिवार की भाषा है। इसे भौगोलिक रूप से सबसे अधिक व्यापक और साहित्यिक उत्कर्ष की दृष्टि से सर्वोपरि माना जाता है।

संस्कृत विश्व की प्राचीनतम भाषाओं में से एक है। इसका साहित्यिक प्रवाह वैदिक युग से आज तक अबाध गति से चल रहा है। इसकी महिमा को देखकर इसे देवभाषा कहा गया है। यह अधिसंख्यक भारतीय भाषाओं की जननी तथा सम्पोषिका मानी जाती है।

संस्कृत भाषा के प्राचीनतम ग्रंथ हैं वेद। कहा जा सकता है कि वेद आर्यों की सभ्यता और संस्कृति के बारे में जानकारी प्राप्त करने के एकमात्र साधन हैं। भारतवर्ष में क्षेत्रीय विषमताओं के होने पर भी जिन तत्त्वों ने इस देश को एक सूत्र में बाँध रखा है, उनमें संस्कृत भाषा तथा इसके साहित्य का योगदान रहा है। मानवीय मूल्यों के विकास की दृष्टि से भी इनका अद्वितीय महत्त्व है।

**संस्कृत शिक्षण के सामान्य उद्देश्य हैं –**

1. संस्कृत भाषा का सामान्य ज्ञान कराना जिससे संस्कृत के सरलांशों को सुनकर या पढ़कर छात्र समझ सकें एवं मौखिक व लिखित अभिव्यक्ति दे सकें।
2. संस्कृत साहित्य के प्रति छात्रों में अभिरुचि उत्पन्न करना।
3. संस्कृत साहित्य की प्रमुख विधाओं, प्राचीन और नवीन रचनाओं से छात्रों को परिचित कराना।
4. छात्रों में राष्ट्रीय, सांस्कृतिक, सामाजिक एवं नैतिक मूल्यों का विकास करना।

उपर्युक्त उद्देश्यों को ध्यान में रखते हुए नवमी कक्षा की 'सलिला' नामक पाठ्यपुस्तक तैयार की गई है। इसमें प्राचीन रचनाओं के साथ आधुनिक संस्कृत रचनाओं का भी समावेश किया गया है। कुछ पाठों के आरंभ में पाठ के संदर्भ दिए गए हैं ताकि छात्रों को पाठ–प्रवेश में आसानी हो। छात्रों की सुविधा के लिए 'शब्दार्थाः' शीर्षक के अंतर्गत पाठ में आए नवीन शब्दों के हिन्दी में अर्थ दिए गए हैं।

कुछ पाठों के अंत में पाठ की विषयवस्तु को पूरी तरह खोलने के लिए भिन्न–भिन्न प्रकार की सामग्री दी गई है। जैसे 'भारतीवसन्तगीतिः' के अंत में सारे श्लोकों का अन्वय और अर्थ बताया गया है। वहीं 'प्रत्यभिज्ञानम्' पाठ में केवल एक श्लोक है जिसका अर्थ अंत में दिया गया है। इसी तरह 'भ्रान्तो बालः' पाठ के अंत में 'पाठयामास' या 'बोधयामास' जैसे अपेक्षाकृत रूप से कम प्रचलित शब्दों के बारे में बताया गया है।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पाठों के साथ आनेवाले चित्र न केवल रोचकता बढ़ाते हैं बल्कि विषयवस्तु को नया आयाम देते हैं। छत्तीसगढ़ की लोक शैली के पुट और चटक रंगों ने इन चित्रों को और अधिक सुंदर बना दिया है।

पाठ्यपुस्तक के अंत में व्याकरण खंड है। उसमें छात्रों की आवश्यकतानुसार संक्षेप में व्याकरण के नियमों को प्रस्तुत किया गया है। इस पाठ्यपुस्तक में वर्तनी से संबंधित परसवर्ण के नियमों को कहीं–कहीं शिथिल किया गया है। सामान्यतः भाषा की प्रवृत्ति सरलीकरण की होती है। इस लिए वर्तनी के सरलीकृत रूप को हमने मान्यता दी है। जैसे – 'गङ्गा' के स्थान पर 'गंगा' और 'चञ्चल' के स्थान पर 'चंचल'।

हम जानते हैं कि कक्षा में बच्चे विविध भाषाओं की संपदा लेकर आते हैं और यह बहुभाषिकता संसाधन है। इसलिए शिक्षक कक्षा में उपलब्ध बहुभाषिकता को आधार बनाकर पाठों का अध्यापन करें।

प्रस्तुत पाठ्यपुस्तक को छात्रों के अनुरूप बनाने का भरपूर प्रयास किया गया है तथापि इसको और अधिक उपयोगी बनाने के लिए आपके बहुमूल्य सुझावों का स्वागत है।

संचालक
राज्य शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
छत्तीसगढ़, रायपुर

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# प्रायोगिक संस्करणम्

**कक्षा – 9वीं**

**पाठ्यक्रम**

**कुल कालखण्ड – 180**

**पूर्णांक – 100**

**सैद्धांतिक – 75**

**प्रायोगिक/प्रायोजना कार्य – 25**

**पाठ्यक्रम संरचना**

| क्र. | इकाई का नाम | विषय वस्तु | कालखण्ड | अंक |
|---|---|---|---|---|
| 1. | **प्रथम** | | – | – |
| | वर्ण एवं वर्तनी | वर्ण परिचय एवं उच्चारण स्थान | 15 | 01 |
| 2. | **द्वितीय** | | | |
| | शब्दरूप<br>(i) स्वरान्त<br><br>(ii) व्य जनान्त<br><br>(iii) सर्वनाम<br><br>(iv) संख्या | बालक, हरि, गुरू, पितृ, रमा, मति, नदी, धेनु, मातृ, फल, वारि, मधु<br><br>राजन् भवत्, आत्मन्, चन्द्रमस्,गच्छत्<br><br>सर्व, यत्, इदम्, एतद्, तद्, किम् (सभी तीनों लि ों में) और अस्मद्, युष्मद्<br><br>51 से 100 तक | 15 | 03 |
| 3. | **तृतीय** | | | |
| | धातु रूप | भू, पा, पच्, खेल्, लिख्, स्था, दृश्, अस्, लभ्, सेव् (लट्,लङ्,लृट्,लोट्,विधिलिङ् लकारों में) | 15 | 03 |
| 4. | **चतुर्थ** | | | |
| | सन्धि–परिचय एवं भेद | 1. स्वर सन्धि (दीर्घ, गुण, वृद्धि, यण्, अयादि, पूर्वरूप, पररूप, प्रकृतिभाव)<br><br>2. व्य जन एवं विर्सग सन्धियों का सामान्य परिचय | 15 | 02 |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| क्र. | इकाई का नाम | विषय वस्तु | कालखण्ड | अंक |
|---|---|---|---|---|
| 5. | **प चम्** | | | |
| | समास–परिचय एवं भेद | तत्पुरूष, द्वन्द्व, द्विगु, अव्ययीभाव, कर्मधारय एवं बहुव्रीहि समास का परिचय | 15 | 02 |
| 6. | **षष्ठ** | | | |
| | प्रत्यय, अव्यय एवं उपसर्ग | (क) कृदन्त – क्त्वा, ल्यप्, शतृ, शानच्, क्त, क्तवतु, तुमुन्, तव्यत्, अनीयर्<br>(ख) तद्धित – मतुप्, इनि, ढक्, त्व, त्रल्, तमप्, तरप्, धा, ठञ्, मयट्<br>(ग) अव्यय व उनका अनुप्रयोग<br>(घ) उपसर्ग | 15 | 2+2+1+1=6 |
| 7. | **सप्तम** | | | |
| | कारक | कारकों का सामान्य परिचय, शुद्ध प्रयोग एवं उस पर आधारित अनुवाद | 10 | 03 |
| 8. | **अष्टम** | | | |
| | रचना<br>(i) निबन्ध<br>(ii)वाक्य एवं अनुच्छेद | सरल संस्कृत वाक्यों में निबन्ध रचना<br>वाक्य एवं अनुच्छेद लेखन | 10 | 5 + 4 |
| 9. | **नवम** | | 10 | 4 + 4 |
| | अपठित गद्यांश एवं पत्र लेखनम् | (i) पाठ्येतर गद्यांश का अभ्यास<br>(ii) संस्कृत भाषा में पारिवारिक एवं प्रार्थना पत्रों का लेखन | | |
| | | | **120** | **कुल अंक 37** |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## पाठ्यक्रम– सरंचना (पाठ्यपुस्तक खण्ड)

| क्रमांक | इकाई का नाम | पाठ | पाठ्यवस्तु | कालखण्ड | अंक |
|---|---|---|---|---|---|
| | पाठ्यपुस्तक | | (i) गद्यांश आधारित प्रश्न<br>(ii) संवाद आधारित प्रश्न<br>(iii) श्लोक आधारित प्रश्न<br>(iv) कंठस्थ श्लोक<br>(v) भावार्थ लेखन<br>(vi) वस्तुनिष्ठ प्रश्न<br>(vii) संस्कृत में प्रश्नोत्तर | 60 | 06<br>06<br>06<br>05<br>03<br>07<br>05 |
| | | | | 60 | 38 |
| | | | **महायोग** | **180** | **कुल अंक 75** |
| 1. | प्रथम इकाई | प्रथमः पाठः<br>द्वितीयः पाठः | वन्दना<br>सम्भाषणम्<br>न त्यक्तव्यः अभ्यासः | | |
| 2. | द्वितीय इकाई | तृतीयः पाठः<br>चतुर्थः पाठः | छत्तीसगढस्य वनानि<br>सुभाषितानि | | |
| 3. | तृतीय इकाई | पञ्चमः पाठः<br>षष्ठः पाठः | प्रत्यभिज्ञानम्<br>सन्तश्रीगहिरागुरूः | | |
| 4. | चतुर्थ इकाई | सप्तमः पाठः<br>अष्टमः पाठः | ब्रेललिपिः<br>सिकतासेतुः | | |
| 5. | पञ्चम् इकाई | नवमः पाठः | रघुवंशम् | | |
| 6. | षष्ठम् इकाई | दशमः पाठः | विश्वबन्धुत्वम् | | |
| 7. | सप्तम् इकाई | एकादशः पाठः | भारतीवसन्तगीतिः | | |
| 8. | अष्टम् इकाई | द्वादशः पाठः | लौहतुला | | |
| 9. | नवम् इकाई | त्रयोदशः पाठः | भ्रान्तोः बालकः | | |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पाठ्यक्रम–प्रायोगिक/प्रायोजन कार्य

**प्रायोगिक कार्य :–**

**(क) मौखिक कार्य : (कोई 2)** 3×2 = 06

(i) संस्कृत में परिचय

(ii) समाचार पत्र

(iii) वार्तालाप

(iv) किसी पात्र/चरित्र पर अभिव्यक्ति

**अंक विभाजन**

(i) मौखिक – 06 अंक

(ii) अभिलेख –06 अंक

(iii) लिखित – 16 अंक

**योग – 25 अंक**

**(ख) लिखित कार्य – (कोई 4)** 4×4 = 16

(i) दैनिक जीवन में प्रयुक्त संस्कृत शब्दों का चयन

(ii) जीवनवृत्त लेखन

(iii) नीति/सुभाषित श्लोक संकलन

(iv) चुटकलों का संग्रह

(v) ध्येय वाक्यों का संग्रह

(vi) अनुच्छेद लेखन

(vii) संयुक्ताक्षर संग्रह

(viii) दैनिक उपयोगी वस्तुओं का संस्कृत नाम

(xi) रचनाओं एवं रचनाकारों की जानकारी

**(ग) प्रायोगिक अभिलेख –** **03 अंक**

उपर्युक्त का लिखित प्रायोगिक पुस्तिका तैयार करना।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अनुक्रमणिका


| क्र. | पाठ | | पृष्ठ क्रमांक |
|---|---|---|---|
| | वन्दना | | 01 |
| 1 | सम्भाषणम् | संवादपाठः | 02—05 |
| 2 | न त्यक्तव्यः अभ्यासः | गद्यपाठः | 06—09 |
| 3 | छत्तीसगढस्य वनानि | गद्यपाठः | 10—13 |
| 4 | सुभाषितानि | पद्यपाठः | 14—18 |
| 5 | प्रत्यभिज्ञानम् | गद्यपाठः | 19—24 |
| 6 | सन्तश्रीगहिरागुरुः | गद्यपाठः | 25—28 |
| 7 | ब्रेललिपिः | गद्यपाठः | 29—33 |
| 8 | सिकतासेतुः | गद्यपाठः | 34—40 |
| 9 | रघुवंशम् | पद्यपाठः | 41—46 |
| 10 | विश्वबन्धुत्वम् | गद्यपाठः | 47—50 |
| 11 | भारतीवसन्तगीतिः | पद्यपाठः | 51—55 |
| 12 | लौहतुला | गद्यपाठः | 56—60 |
| 13 | भ्रान्तोः बालकः | गद्यपाठः | 61—66 |
| | व्याकरणखण्डम् | | 67—136 |


Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# वन्दना



**या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता,**
**या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।**
**या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता,**
**सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा।।**

*जो कुन्द के फूल, चन्द्रमा, बर्फ और हार के समान श्वेत हैं, जो शुभ्र वस्त्र पहनती हैं, जिनके हाथ उत्तम वीणा से सुशोभित हैं, जो श्वेत कमल के आसन पर बैठती हैं, ब्रह्मा, विष्णु, महेश आदि देव जिनकी सदा स्तुति करते हैं और जो सब प्रकार की जड़ता हर लेती हैं, वे भगवती सरस्वती मेरी रक्षा करें।*

**शारदा शारदाम्भोजवदना वदनाम्बुजे।**
**सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात्।।**

*शरद काल में उत्पन्न कमल के समान मुखवाली और सब मनोरथ को देनेवाली शारदा सब सम्पत्तियों के साथ मेरे मुख में सदा निवास करें।*

**सरस्वति महाभागे विद्ये कमललोचने।**
**विद्यारूपे विशालाक्षि विद्यां देहि नमोऽस्तुते।।**

*हे महाभाग्यवती, ज्ञानस्वरूपा, कमल के समान विशाल नेत्रवाली, ज्ञानदात्री सरस्वति! मुझको विद्या दो, मैं तुमको प्रणाम करता हूँ।*

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**प्रथमः पाठः**

# सम्भाषणम्

*यह एक सम्भाषण पाठ है जिसमें दो सम्वाद हैं। पहले सम्वाद में पीलाराम एक शिक्षक की भूमिका में हैं। इस पाठ में गोपाल,उमेश तथा पियासी छात्र–छात्रा की भूमिका में हैं। दूसरे सम्वाद में फ्लोरा और विद्यावती दो सहेलियाँ हैं।*

**1.**



पीलारामः – भो छात्राः! अद्य किं पठितुम् इच्छा अस्ति ?

छात्राः समवेतः – श्रीमन् ! अद्य वयं विवेकानन्दविषये ज्ञातुम् इच्छामः।

पीलारामः – उत्तमम्! वयं विवेकानन्दस्य बाल्यकालविषये ज्ञास्यामः।

गोपालः – विवेकानन्दः बाल्यकाले कीदृशः आसीत् ? सः किं किं करोति स्म ?

पीलारामः – विवेकानन्दः बाल्यकाले साहसी आसीत्। तस्मै क्रीडा अतीव रोचते स्म।

गोपालः – सः कथं प्रसिद्धः जातः?

पीलारामः – सः जिज्ञासुः आसीत्। धर्मविषये तस्य जिज्ञासा कालक्रमेण बलवती जाता। भाषाध्ययनं तस्य ज्ञानवृद्धिम् अकरोत्। सः महान् वक्तारूपेणापि ख्यातिं प्राप्तवान्। :

पियासी – श्रीमन्! मम माता वदति स्म यत् बाल्यकाले विवेकान्दस्य नाम नरेन्द्रः आसीत्। किमिदं सत्यम् ?

पीलारामः – आम् सत्यम्। कालान्तरे सः विवेकानन्दनाम्ना विश्वविख्यातः अभवत्।

उमेशः – तस्य विषये अन्यः कोऽपि विशेषः?

पीलारामः – तस्य विचारः उत्तमः आसीत् यत् मानवसेवा एव ईश्वरसेवा अस्ति। तस्य प्रभावेण जनाः संघटिताः भवन्ति स्म। सः देशे विदेशे च भारतीयसंस्कृतिम् उपदिशति स्म।

पियासी – महोदय! रायपुरनगरस्य विमानपत्तनं कथं विवेकानन्दनाम्ना प्रख्यातम् ?

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



पीलारामः – किशोरावस्थायां विवेकानन्दः रायपुरनगरे कालं व्यतीतवान्। श्रूयते यत् सः शकटेन नागपुरतः रायपुरम् आगच्छत्। अत्र सः संगीतशिक्षाम् अगृह्णात्। तस्य स्मरणार्थमेव विमानपत्तनस्य नाम विवेकानन्द इति दत्तम्।

उमेशः – श्रीमन्! पाककलायां च विवेकानन्दस्य रुचिः आसीत्। इदमपि तथ्यम्।

पीलारामः – आम्।

2.



फ्लोरा – विद्यावति! विद्यावति!

विद्यावती – आम्।

फ्लोरा – अत्रागच्छतु। भवती किं करोति ?

विद्यावती – इदानीम् अहं स्नानं करोमि।

फ्लोरा – भवती शीघ्रं स्नात्वा आगच्छतु।

विद्यावती – किमर्थं शीघ्रम् ?

फ्लोरा – गृहे शाकं नास्ति। भवती आपणं गत्वा शाकम् आनयतु।

विद्यावती – फ्लोरे! अहं वस्त्रं धृत्वा गच्छामि।

फ्लोरा – शीघ्रं द्विचक्रिकया गच्छतु।

विद्यावती – द्विचक्रिका सम्यक् नास्ति।

फ्लोरा – किं घटितम् ?

विद्यावती – इयं भग्ना जाता। अहं धावित्वा गच्छामि।

फ्लोरा – धावित्वा मा गच्छतु। आपणे यातायातं सघनं भवति। त्वया सर्तकतापेक्षिता। शृणोतु ! सूरणस्य मूल्यम् अपि ज्ञातव्यम्।

विद्यावती – अस्तु। यावत् अहम् आगच्छामि तावत् भवती कक्षं प्रक्षालयतु।

फ्लोरा – आम्। अहं कक्षसज्जां करोमि।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| ख्यातिम् | – | प्रसिद्धि | कालान्तरे | – | बाद में |
| संघटिताः | – | संगठित | विमानपत्तनस्य | – | हवाई अड्डे का |
| व्यतीतवान् | – | बिताया | श्रूयते | – | सुना जाता है |
| शकटेन | – | बैलगाड़ी से | दत्तम् | – | दिया गया |
| आपणम् | – | मंडी, दुकान | द्विचक्रिकया | – | साइकिल से |
| भग्ना | – | टूटी हुई | सूरणस्य | – | जिमिकंद का |
| यावत् | – | जब तक | तावत् | – | तब तक |

## अभ्यासः

**1. रिक्तस्थानानि पूरयत –**

(क) भो छात्राः ............... किम् इच्छति ?

श्रीमन्! अद्य वयं ................. विषये ज्ञातुम् इच्छामः।

विवेकानन्दः ......................... साहसी आसीत्।

तस्य बाल्यनाम ........................... भवति स्म।

(ख) भवती किं ............................।

........................... शीघ्रं स्नात्वा आगच्छतु।

गृहे .......................... नास्ति।

..................... भग्ना जाता।

**2. सन्धिविच्छेदं कुरुत –**

अतीव –

वक्तारूपेणापि –

अत्रागच्छतु –

नास्ति –

सर्तकतापेक्षिता –

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**3. उदाहरणमनुसृत्य निम्नलिखितेषु क्रियापदेषु 'तुमुन्' प्रत्ययं योजयित्वा पदनिर्माणं कुरुत –**

| | | | | | |
|---|---|---|---|---|---|
| **यथा–** | पठ् | + | तुमुन् | = | पठितुम् |
| | गम् | + | तुमुन् | = | ........................ |
| | दृश् | + | तुमुन् | = | ........................ |
| | दा | + | तुमुन् | = | ........................ |
| | कृ | + | तुमुन् | = | ........................ |

**4. पाठे प्रयुक्तान् अव्ययपदान् चिनुत –**

यथा – अत्र

..................

..................

..................

..................

**5. स्वसहपाठिनां नामानि संस्कृते लिखत –**

**यथा** – गोपालः, पियासी, उमेशः

**6. तव क्षेत्रे गृहे वा कानि कानि शाकानि उपलब्धानि ?**

**7. द्विचक्रिकायाः विषये मातृभाषया पञ्चवाक्यानि लिखत।**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## द्वितीयः पाठः

# न त्यक्तव्यः अभ्यासः

कस्मिंश्चित् ग्रामे बहुकालपर्यन्तम् अनावृष्टिः आसीत्। भूमिः शुष्का जाता। पानजलस्य अपि अभावः जातः। तदा जनाः दैवज्ञस्य समीपं गत्वा विचारितवन्तः। दैवज्ञः ग्रहगतिं परिशील्य उक्तवान् ''न केवलम् अस्मिन् वर्षे अपि तु आगामिवर्षत्रयपर्यन्तमत्र वृष्टिः न भविष्यति'' इति।



तत् श्रुत्वा ग्रामवासिनः सर्वे जीवनार्थं यत्र कुत्रापि गतवन्तः। स ग्रामः एव निर्जनः जातः। परन्तु तस्मिन् अपि काले तस्य ग्रामस्य एकः कृषकः तत्र स्थितवान्। जलाभावेऽपि सः प्रतिदिनं स्वशुष्कक्षेत्रं कर्षन् आसीत्।

एकदा आकाशे एकः मेघः **सूचरन्** आसीत्। सः कृषकं दृष्ट्वा आश्चर्यचकितः सन् तम् अपृच्छत्– हे कृषक! अत्र त्रिवर्षपर्यन्तं वृष्टिः न भविष्यति इति किं भवता न श्रुतम्? तत्कारणेनैव सर्वे जनाः ग्रामं परित्यज्य यत्र कुत्रापि गताः। तथापि भवान् किमर्थम् इदं शुष्कं क्षेत्रं वृथा कर्षति'' इति।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



तदा कृषकः अवदत्– ''सर्वे विषयाः मया ज्ञाताः एव। किन्तु त्रिवर्षं यावत् यदि अहं कृषिकार्यं न करोमि तर्हि त्रिवर्षानन्तरं यदा वृष्टिः भविष्यति तदा मम कृषिकार्यं विस्मृतं भवेत्। तावता मम क्षेत्रकर्षणस्य अभ्यासः एवं नष्ट भवेत्। अतएव अस्य कार्यस्य विस्मरणपरिहारार्थम् अहम् इदानीमपि कर्षामि'' इति।

तत् श्रुत्वा मेघः ''साधु, साधु'' इति वदन् चिन्तितवान्– ''यदि अहमपि त्रिवर्षं यावत् न वर्षामि तर्हि मया अपि वर्षणं विस्मृतं भवेत्। अतः अहम् अधुना एव वर्षामि'' इति।

ततः सः झटिति सर्वान् मेघान् आहूय ''कृपया वर्षन्तु'' इति प्रार्थितवान्। तदा तत्र सुवृष्टिः अभवत्। सर्वेऽपि ग्रामवासिनः आनन्देन स्वक्षेत्रे कृषिकार्यम् आरब्धवन्तः।

एतस्मिन् सन्दर्भे वयम् इदं पद्यं स्मरामः –

**अभ्यासो न हि त्यक्तव्यः अभ्यासो हि परं बलम्।**
**अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम्।।**

## शब्दार्थाः

| | | |
|---|---|---|
| कस्मिंश्चित् ग्रामे | – | किसी ग्राम में |
| अनावृष्टिः | – | अकाल |
| तदा | – | तब |
| दैवज्ञः | – | दैव को जाननेवाला |
| स्थितवान् | – | रहता था |
| कृषकः | – | किसान (कृषिकः व कर्षकः का अर्थ भी किसान होता है) |
| कर्षामि | – | जुताई करता हूँ |
| वदन् | – | बोलता हुआ |
| चिन्तितवान् | – | सोचा |
| वर्षन्तु | – | बरसें |
| प्रार्थितवान् | – | प्रार्थना की |
| ग्रामवासिनः | – | गाँववाले |
| साधु साधु | – | अच्छा अच्छा |
| सुवृष्टिः | – | अच्छी बारिश |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत –**

क) भूमिः कथं शुष्का अभवत् ?

ख) दैवज्ञः ग्रहगतिं परिशील्य किम् उक्तवान् ?

ग) अनावृष्टौ ग्रामवासिनः किम् अकुर्वन् ?

घ) कृषकः शुष्कं क्षेत्रं किमर्थं कर्षति ?

ङ) मेघः सर्वान् मेघान् आहूय किं प्रार्थनाम् अकरोत् ?

**2. पाठं दृष्ट्वा रिक्तस्थानानि पूर्तिं कुरुत –**

क) आगामिवर्षत्रयपर्यन्तमत्र ............................... न भविष्यति।

ख) तस्य ग्रामस्य एकः ......................... तत्र स्थितवान् ।

ग) इदं शुष्कं क्षेत्रं ..................... कर्षति ।

घ) यदा वृष्टिः भविष्यति तदा मम कृषिकार्यं ............................ भवेत्।

ङ.) आनन्देन स्वक्षेत्रे कृषिकार्यं ..................................................।

**3. अधोलिखितानि कथनानि कः कं च कथयन्ति –**

| कथनानि | कः | कम् / कान् |
|---|---|---|
| क) अत्र त्रिवर्षपर्यन्तं वृष्टिः न भविष्यति | ................. | .................. |
| ख) सर्वे विषयाः मया ज्ञाताः एव | ................ | .................. |
| ग) साधु, साधु | ................. | .................. |
| घ) अहम् अधुना एव वर्षामि | .................. | .................. |
| ङ.) कृपया वर्षन्तु | ................. | .................. |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**4. स्तम्भमेलनं कुरुत –**

1) सुवृष्टिः – परं बलम्

2) पानजलस्य – अभवत्

3) शुष्कं क्षेत्रम् – विचारितवन्तः

4) ग्रामवासिनः – कर्षति

5) अभ्यासो हि – अभावः

**5. अधोलिखितेषु पदेषु ल्यप् प्रत्ययान्त–पदान् चिनुत –**

अभ्यासः, परिशील्य, गत्वा, उक्तवान्, दृष्ट्वा, परित्यज्य, आहूय

**6. अधोलिखितेषु वाक्येषु क्रियापदानि लोट्लकारे परिवर्तयत–**

**यथा** – अनावृष्टिः न भविष्यति। – अनावृष्टिः न भवतु।

क) कृषकः शुष्कं क्षेत्रं कर्षति । – ......................

ख) मेघाः अत्र वर्षन्ति। – ......................

ग) कदापि वर्षणं न विस्मरति। – .....................

घ) कृषिकार्यम् आरभते। – .....................

ड.) वयम् पद्यं स्मरामः। – .....................

**7. अधोलिखिते श्लोके पदपूर्तिं कुरुत –**

अभ्यासो न हि .................अभ्यासो ................. परं बलम्।

.................विषं विद्या अजीर्णे .......................................... ।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



तृतीयः पाठः

# छत्तीसगढप्रदेशस्य वनानि


छत्तीसगढप्रदेशः वनानां दृष्ट्या समृद्धः वर्तते। छत्तीसगढस्य सकलक्षेत्रफलस्य 44.2 प्रतिशतानि क्षेत्राणि वनाच्छादितानि सन्ति। एतानि वनक्षेत्राणि राष्ट्रस्य वनक्षेत्राणां अनुमानितम् 12.26 प्रतिशतानि।

वनम् अस्माकं महान् निधिः अस्ति। न केवलं वनानां रमणीयता मनांसि रञ्जयति, अपितु अनेन पर्यावरणमपि सुरक्षितं भवति। ये घटकाः पारिस्थितिकितन्त्रं प्रभावयन्ति, तेषु घटकेषु वनं सर्वप्रमुखमस्ति। वस्तुतः वनं वसुन्धरायाः सुरक्षावलयमस्ति। वृष्टेः मुख्यं कारणं वनमेव अस्ति। इदं शुद्धं वायुं प्रददाति। मृत्तिकायाः अपर्दनं न्यूनीकरोति। जगतः तापमानस्य नियन्त्रणं करोति। अतएव वनसंरक्षणम् अत्यावश्यकमस्ति।

विविधाभिः वनसम्पद्भिः सम्पन्नानि वनानि प्रदेशे विद्यन्ते। विधिकप्रबन्धदृष्ट्या वनानि त्रिवर्गेषु विभक्तानि – आरक्षितं वनं, संरक्षितं वनम् अवर्गीकृतं वनं च।

आरक्षितं वनम् – आरक्षितवनस्य प्रबन्धनं सुव्यवस्थितं भवति। अस्य सुरक्षायाः विकासस्य च निश्चिताः योजनाः भवन्ति। राष्ट्रियोद्यानम् अभ्यारण्यं च आरक्षितं वनम् एव स्तः।

संरक्षितं वनम् – संरक्षितवने संरक्षणेन सह उत्पादनाय गतिविधयः क्रियान्विताः भवन्ति। वनविभागः योजनानुसारं वैज्ञानिकविधिना वनोत्पादं प्राप्नोति। अत्र उत्पादनेन सह वनसंरक्षणं प्रथमं लक्ष्यमस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



अवर्गीकृतं वनम् – वनभूमेः व्यवस्थापनसमये यस्य वनक्षेत्रस्य वर्गीकरणं नाभवत् तदेव अवर्गीकृतवनम्। अत्र सर्वकारेण नास्ति कोऽपि प्रतिबन्धः। अस्मिन् वनक्षेत्रे जनार्थं काष्ठसंग्रहणस्य पशुचारणस्य च स्वतन्त्रता अस्ति।

छत्तीसगढप्रदेशस्य वनानि उष्णकटिबन्धीयश्रेण्यां वर्तन्ते। एतानि वनानि अति गहनानि सन्ति। वनानां गहनादेव कानिचित् क्षेत्राणि तु दुर्गमानि। प्रदेशस्य उत्तरदक्षिणभागयोः सघनानि वनानि सन्ति, परन्तु मध्यभागे विरलानि। एतेषां विशेषता अस्ति यत् तानि सर्वाणि पर्णपातिवनानि सन्ति। तत्र मुख्यतः वृक्षाणां द्वे प्रजाती स्तः – सालः सागौनश्च। अन्याः प्रजातयः अपि सन्ति – खदिरः, तेन्दुः, वंशः, आमलकी, साजा, बीजा, धवरा, कर्रा, हल्दुः मधुकश्चेति।

उपलब्धासु वनस्पतिषु ओषधिपादपाः प्रचुरमात्रायाम् उपलभ्यन्ते। प्रदेशस्य बहवः उद्योगाः वनोत्पादने एव अवलम्बिताः, यथा काष्ठं, कर्गदं, हरीतिकी, वंशं खदिरः च। वनानि एतानि जनेभ्यः आजीविकायाः साधनानि सन्ति।

वन्यजीवानां बहुलता विविधता च प्रदेशस्य गौरवम्। एतेषाम् उपलब्धता तत्क्षेत्रे वनानां सुस्थितिः द्योतते। एतेषु वन्यजीवेषु प्रमुखतः व्याघ्रः, तरक्षुः, वनमहिषः, हरिणः, साम्भरः, गौरः, वनवराहः, भल्लूकः, पर्वतसारिका, नीलगौः चिंकारादयः चेति। वनमहिषः राजकीयपशुः पर्वतसारिका राजकीयपक्षी च घोषितौ। वन्यजीवानां रक्षणार्थमपि वनसंरक्षणं आवश्यकम्।

नूनं वनं जीवानाम् आश्रयस्थलमस्ति। तस्मात् कारणात् प्रदेशे राष्ट्रियोद्यानानि अभयारण्यानि च संस्थापितानि सन्ति।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| दृष्ट्या | – | दृष्टि से | वनाच्छादितानि | – | वन से ढँका हुआ |
| रमणीयता | – | सुन्दरता | रञ्जयति | – | प्रसन्न करती है |
| पारिस्थितिकितन्त्रम् | – | पर्यावरण तन्त्र को | घटकाः | – | कारक |
| वसुन्धरायाः | – | पृथ्वी का | सुरक्षावलयम् | – | सुरक्षा कवच |
| मृत्तिकायाः | – | मिट्टी का | अपर्दनम् | – | कटाव |
| न्यूनीकरोति | – | कम करता है | जगतः | – | संसार का |
| वनसम्पद्भिः | – | वन सम्पत्तियों से | विधिकप्रबन्धदृष्ट्या | – | व्यवस्था की दृष्टि से |
| प्रतिबन्धः | – | रोक | उष्णकटिबन्धीय–श्रेण्याम् | – | उष्णकटिबन्ध की श्रेणी में |
| आमलकी | – | आँवला | मधुकः | – | महुआ |
| कर्गदम् | – | कागज | हरीतिकी | – | हर्रा |
| वंशः | – | बाँस | खदिरः | – | खैर |
| उपलभ्यन्ते | – | उपलब्ध होते हैं | तरक्षुः | – | तेंदुआ |
| वनमहिषः | – | वनभैंसा | भल्लूकः | – | भालू |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | | | | |
|---|---|---|---|---|---|
| पर्वतसारिका | – | पहाड़ी मैना | नीलगौः | – | नीलगाय |
| सुस्थितिः | – | अच्छी स्थिति | द्योतते | – | प्रतीत होता है |
| नूनम् | – | निश्चय ही | | | |

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत –**

क) छत्तीसगढप्रदेशः केन समृद्धः ?

ख) अत्र वनानि कति वर्गेषु विभक्ताः ?

ग) अवर्गीकृतवनस्य का विशेषता ?

घ) एतानि वनानि कस्यां श्रेण्यां वर्तन्ते ?

ड.) वनस्य महत्त्वं किम् ?

**2. हिन्दीभाषया अनुवादं कुरुत –**

क) वनम् अस्माकं महान् निधिः अस्ति।

ख) जगतः तापमानस्य नियन्त्रणं करोति।

ग) मुख्यतः वृक्षाणां द्वे प्रजाती स्तः।

घ) वनानि जनेभ्यः आजीविकायाः साधनानि सन्ति।

ड.) अत्र गहनानां वनानां प्रचुरता अस्ति।

**3. एतेषां शब्दानां विभक्तिं वचनं च लिखत –**

| | **विभक्तिः** | **वचनम्** |
|---|---|---|
| प्रतिशतानि | ............................ | ............................ |
| वर्गीकरणम् | ............................ | ............................ |
| अपर्दनम् | ............................ | ............................ |
| एतानि | ............................ | ............................ |
| आजीविकायाः | ............................ | ............................ |
| | ............................ | ............................ |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**4. रेखांकित–पदमाधृत्य प्रश्ननिर्माणं कुरुत –**

क) छत्तीसगढप्रदेशः वनानां दृष्ट्या समृद्धः वर्तते।

ख) अत्र सर्वकारेण नास्ति कोऽपि प्रतिबन्धः।

ग) वनानि उष्णकटिबन्धीयश्रेण्यां वर्तन्ते।

घ) वन्यजीवानाम् बहुलता विविधता च प्रदेशस्य गौरवम्।

ड.) नूनं वनं जीवानाम् आश्रयस्थलमस्ति।

**5. रिक्तस्थानानि पूरयत –**

उदन्ती अभ्यारण्यम् ................................ मण्डले स्थितम्।

धमतरीमण्डले .............................. अभ्यारण्यम् अस्ति।

पामेड अभ्यारण्यम् ............................. मण्डले अस्ति।

कवर्धामण्डले ............................... अभ्यारण्यम् अस्ति।

**6. छात्र छत्तीसगढ़ के मानचित्र में वनक्षेत्रों की पहचान करें।**

**7. अपने इलाके में पाए जाने वाले वन्य पशु–पक्षियों के नामों को सूचीबद्ध करें।**

## छत्तीसगढप्रदेशस्य प्रमुखानि अभ्यारण्यानि

| | | |
|---|---|---|
| *उदन्ती अभ्यारण्य* | – | *गरियाबंद मण्डल* |
| *सीतानदी अभ्यारण्य* | – | *धमतरी मण्डल* |
| *वारनवापारा अभ्यारण्य* | – | *महासमुन्द मण्डल* |
| *भैरमगढ़ अभ्यारण्य* | – | *बीजापुर मण्डल* |
| *पामेड़ अभ्यारण्य* | – | *बीजापुर मण्डल* |
| *अचानकमार अभ्यारण्य* | – | *मुंगेली मण्डल* |
| *सारंगढगोमरदा अभ्यारण्य* | – | *रायगढ मण्डल* |
| *बादलखोल अभ्यारण्य* | – | *जशपुर मण्डल* |
| *सेमरसोत अभ्यारण्य* | – | *सरगुजा मण्डल* |
| *तमोरपिंगला अभ्यारण्य* | – | *सरगुजा मण्डल* |
| *भोरमदेव अभ्यारण्य* | – | *कवर्धा मण्डल* |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



चतुर्थः पाठः

# सुभाषितानि

तपो बलं तापसानां ब्रह्म ब्रह्मविदां बलम्।
हिंसा बलमसाधूनां क्षमा गुणवतां बलम्।।1।।

उद्योगे नास्ति दारिद्र्यं जपतो नास्ति पातकम्।
मौने च कलहो नास्ति नास्ति जागरिते भयम्।। 2।।

विद्या विवादाय धनं मदाय, शक्तिः परेषां परपीडनाय।
खलस्य साधोर्विपरीतमेतद्, ज्ञानाय दानाय च रक्षणाय ।। 3।।

येषां न विद्या न तपो न दानं, ज्ञानं न शीलं गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूताः, मनुष्यरूपेण मृगाश्चरन्ति।। 4।।

सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम्।
सुखार्थी वा त्यजेद् विद्यां विद्यार्थी वा त्यजेत् सुखम्।। 5।।

छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः।
इति विमृशन्तः सन्तः संतप्यन्ते न लोकेषु।। 6।।

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा।। 7।।
न सा सभा यत्र न सन्ति वृद्धा न ते वृद्धा ये न वदन्ति धर्मम्।
नासौ धर्मो यत्र न सत्यमस्ति, न तत् सत्यं यच्छलेनाभ्युपेतम्।। 8।।

पुष्पे गन्धं तिले तैलं काष्ठेऽग्निं पयसि घृतम्।
इक्षौ गुडं तथा देहे पश्याऽऽत्मानं विवेकतः।। 9।।

सत्येन धार्यते पृथिवी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्।। 10।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शब्दार्थाः

| | | |
|---|---|---|
| ब्रह्मविदां | – | ब्रह्मज्ञानियों का |
| पातकम् | – | पाप |
| परेषां | – | दूसरों के |
| परपीडनाय | – | दूसरों को दुख देने के लिए |
| खलस्य | – | दुष्ट का |
| भुवि | – | पृथ्वी पर |
| रोहति | – | चढ़ता है, बढ़ता है |
| उपचीयते | – | बढ़ता है |
| विमृशन्तः | – | विचार करते हुए |
| मृगाः | – | पशु (हिरण आदि) |
| अभ्युपेतम् | – | युक्त |
| इक्षौ | – | ईंख में |
| धार्यते | – | धारण किया जाता है |

## अभ्यासः

**1. अधोलिखितेषु शब्देषु उचितं सन्धिं चिनुत –**

| | | |
|---|---|---|
| छिन्नोऽपि | = | छिन्नः+अपि / छिन्ना+अपि |
| क्षीणोऽप्युपचीयते | = | क्षीणः+अप्युपचीयते / क्षीणः+अपि+उपचीयते |
| पुनश्चन्द्रः | = | पुनः+चन्द्रः / पुनश्+चन्द्रः |
| मृगाश्चरन्ति | = | मृगाः+चरन्ति / मृगाः+च+रन्ति |
| नासौ | = | ना+सौ / न+असौ |
| यच्छलेनाभ्युपेतम् | = | यत्+छलेन+अभि+उपेतम् / यच्+छलेना+अभि+उपेतम् |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



काष्ठेऽग्निम् = काष्ठे+अग्निम्/काष्ठ+अग्निम्

वायुश्च = वायुः+च/वायु+च

पश्याऽऽत्मानम् = पश्याऽऽत्मा+नम्/पश्य+आत्मानम्

**2. निम्नाि तप्रश्नानामुत्तराणि संस्कृतभाषया लिखत –**

क) तापसानां बलं किम् अस्ति ?

ख) कस्मिन् कलहो नास्ति?

ग) छिन्नोऽपि कः रोहति ?

घ) सभायाः का परिभाषा ?

ङ.) केन धार्यते पृथिवी ?

**3. अधोप्रदत्तानां प्रश्नानाम् उत्तराणि हिन्दीभाषया लिखत –**

क) खलस्य शक्तिः किमर्थं भवति?

ख) विद्यार्थिनः किं त्यजेत् ?

ग) चन्द्रः कथम् उपचीयते ?

घ) कनकं कैः परीक्ष्यते?

ङ.) विवेकतः आत्मानं कुत्र पश्य ?

**4. शुद्धं विकल्पं चित्वा रिक्तस्थानानि पूरयत –**

क) खलस्य धनं ............................ भवति। (मदाय, मदेन, मदम्)

ख) विद्यार्थिनः सुखम्............................ । (अस्ति, नास्ति, सन्ति)

ग) ............................ पुरुषः परीक्ष्यते। (चत्वारः, चतसृर्भिः, चतुर्भिः)

घ) यत्र वृद्धाः न सन्ति ......................... सभा नास्ति। ( सः, सा, तत् )

क) सर्वं सत्ये ........................ । ( प्रतिष्ठितम्, प्रतिष्ठितः, प्रतिष्ठितानि )

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**5.तालिकामनुसृत्य पदानि रचयत –**

| शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|---|
| क्षमा | क्षमा | क्षमे | क्षमाः | प्रथमा |
| तरु | ............ | ............ | ............ | द्वितीया |
| सभा | ............ | ............ | ............ | तृतीया |
| सत्य | ............ | ............ | ............ | चतुर्थी |
| बन्धु | ............ | ............ | ............ | पंचमी |
| चतुर् (चार) | ............ | ............ | ............ | षष्ठी |
| अदस् (नपु.) | ............ | ............ | ............ | सप्तमी |

**6.'क' वर्गं 'ख' इति वर्गेन सह योजयत।**

| 'क' वर्ग | | 'ख' वर्ग |
|---|---|---|
| सत्येन तपति | – | दारिद्र्यम् |
| जागरिते नास्ति | – | धनक्षयम् |
| परद्वेषात् भवति | – | भयम् |
| रक्षणाय भवति | – | रविः |
| उद्योगे नास्ति | – | शक्तिः |

**7. उदाहरणमनुसृत्य अधोलिखितपदेषु प्रकृतिप्रत्ययविभागं/संयोगं कुरुत –**

| | | | |
|---|---|---|---|
| यथा | – जागरितम् | = | जागृ + क्त |
| कृ | + क्त | = | .................. |
| ......... | + क्त | = | छिन्नः |
| क्षि | + क्त | = | .................. |
| वृध् | + ....... | = | वृद्धः |
| प्रति | + ......... + क्त | = | प्रतिष्ठितम् |


Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**प चमः पाठः**

# प्रत्यभिज्ञानम्



*प्रस्तुत पाठ भासरचित 'प चरात्रम्' नामक नाटक का अंश है। इसमें महाभारत के विराट पर्व की कथा है। अपने अज्ञातवास में पाण्डव वेष बदलकर राजा विराट के राज्य में रह रहे थे। दुर्योधन आदि कौरव वीरों ने राजा विराट की गायों का अपहरण कर लिया। राजा विराट का पुत्र उत्तर है। वह बृहन्नला के छद्मवेष में रहनेवाले अर्जुन को अपना सारथि बनाता है और कौरवों से युद्ध करने जाता है। कौरवों की ओर से अर्जुन का पुत्र अभिमन्यु भी युद्ध करता है। युद्ध में कौरवों की पराजय होती है। इसी बीच विराट को सूचना मिलती है कि वल्लभ के छद्मवेष में रहनेवाले भीम ने रणभूमि में अभिमन्यु को पकड़ लिया है। अभिमन्यु भीम तथा अर्जुन को नहीं पहचान पाता और उनसे उग्र होकर बातचीत करता है। दोनों अभिमन्यु को महाराज विराट के समक्ष प्रस्तुत करते हैं। अभिमन्यु उन्हें प्रणाम नहीं करता। उसी समय राजकुमार उत्तर वहाँ पहुँचता है। वह अर्जुन तथा भीम आदि पाण्डवों के छद्मवेष का रहस्योद्घाटन करता है।*

भटः – जयतु महाराजः।

राजा – अपूर्व इव ते हर्षो ब्रूहि केनासि विस्मितः ?

भटः – अश्रद्धेयं प्रियं प्राप्तं सौभद्रो ग्रहणं गतः।।

राजा – कथमिदानीं गृहीतः ?

भटः – रथमासाद्य निशश ं बाहुभ्यामवतारितः।

(प्रकाशम्) इत इतः कुमारः।

अभिमन्युः – भोः को नु खल्वेषः? येन भुजैकनियन्त्रितो बलाधिकेनापि न पीडितः अस्मि।

बृहन्नला – इत इतः कुमारः।

अभिमन्युः – अये! अयमपरः कः विभात्युमावेषमिवाश्रितो हरः।

बृहन्नला – आर्य, अभिभाषणकौतूहलं मे महत्। वाचालयत्वेनमार्यः।

भीमसेनः – (अपवार्य) बाढम् (प्रकाशम्) अभिमन्यो!

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



अभिमन्युः – अभिमन्युर्नाम ?

भीमसेनः – रुष्यत्येष मया त्वमेवैनमभिभाषय।

बृहन्नला – अभिमन्यो!

अभिमन्युः – कथं ? कथम्? अभिमन्युर्नामाहम्। भोः! किमत्र विराटनगरे क्षत्रियवंशोद्भूताः नीचैः अपि नामभिः अभिभाष्यन्ते अथवा अहं शत्रुवशं गतः। अतएव तिरस्क्रियते।

बृहन्नला – अभिमन्यो! सुखमास्ते ते जननी ?

अभिमन्युः – कथं कथम् ? जननी नाम ? किं भवान् मे पिता अथवा पितृव्यः ? कथं मां पितृवदाक्रम्य स्त्रीगतां कथां पृच्छसे ?

बृहन्नला – अभिमन्यो! अपि कुशली देवकीपुत्रः केशवः ?

अभिमन्युः – कथं कथम्? तत्रभवन्तमपि नाम्ना। अथ किम् अथ किम् ?
(उभौ परस्परमवलोकयतः)

अभिमन्युः – कथमिदानीं सावज्ञमिव मां हस्यते ?

बृहन्नला – न खलु किञ्चित्।

**पार्थं पितरमुद्दिश्य मातुलं च जनार्दनम्।**
**तरुणस्य कृतास्त्रस्य युक्तो युद्धपराजयः।।**

अभिमन्युः – अलं स्वच्छन्दप्रलापेन! अस्माकं कुले आत्मस्तवं कर्तुमनुचितम्। रणभूमौ हतेषु शरान् पश्य, मदृते अन्यत् नाम न भविष्यति।

बृहन्नला – एवं वाक्यशौण्डीर्यम्। किमर्थं तेन पदातिना गृहीतः ?

अभिमन्युः – अशस्त्रं मामभिगतः। पितरम् अर्जुनं स्मरन् अहं कथं हन्याम्। अशस्त्रेषु मादृशाः न प्रहरन्ति। अतः अशस्त्रोऽयं मां वञ्चयित्वा गृहीतवान्।

राजा – त्वर्यतां त्वर्यतामभिमन्युः।

बृहन्नला – इत इतः कुमारः। एष महाराजः। उपसर्पतु कुमारः।

अभिमन्युः – आः। कस्य महाराजः ?

राजा – एह्येहि पुत्र! कथं न मामभिवादयसि ? (आत्मगतम्) अहो! उत्सिक्तः खल्वयं क्षत्रियकुमारः। अहमस्य दर्पप्रशमनं करोमि। (प्रकाशम्) अथ केनायं गृहीतः ?

भीमसेनः – महाराज! मया।

अभिमन्युः – अशस्त्रेणेत्यभिधीयताम्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| भीमसेनः | – | शान्तं पापम्। धनुस्तु दुर्बलैः एव गृह्यते। मम तु भुजौ एव प्रहरणम्। |
| अभिमन्युः | – | मा तावद् भोः! किं भवान् मध्यमः तातः, यः तस्य सदृशं वचः वदति। |
| | | (ततः प्रविशत्युत्तरः) |
| उत्तरः | – | तात! अभिवादये! |
| राजा | – | आयुष्मान् भव पुत्र। पूजिताः कृतकर्माणो योधपुरुषाः। |
| उत्तरः | – | पूज्यतमस्य क्रियतां पूजा। |
| राजा | – | पुत्र! कस्मै ? |
| उत्तरः | – | इहात्रभवते धन जयाय। .... व्यपनयतु भवा छड्.काम्। अयमेव अस्ति धनुर्धरः धन जयः। |
| बृहन्नला | – | यद्यहं अर्जुनः तर्हि अयं भीमसेनः अयं च राजा युधिष्ठिरः। |
| अभिमन्युः | – | इहात्रभवन्तो मे पितरः। तेन खलु ........... |
| | | (इति क्रमेण सर्वान् प्रणमति, सर्वे च तम् आलि न्ति।) |

## शब्दार्थाः

| | | |
|---|---|---|
| प्रत्यभिज्ञानम् | – | पहचान |
| अपूर्वः | – | जो पहले न हुआ हो |
| अश्रद्धेयम् | – | श्रद्धा के अयोग्य |
| सौभद्रः | – | अभिमन्यु |
| आसाद्य | – | पाकर, पहुँचकर |
| निश्शङ्कम् | – | बिना किसी हिचक के |
| भुजैकनियन्त्रितः | – | एक ही हाथ से पकड़ा गया |
| विभाति | – | सुशोभित होता है |
| कौतूहलम् | – | जानने की उत्कण्ठा |
| अपवार्य | – | हटाकर |
| रुष्यति | – | क्रोधित होता है |
| वाचालयतु | – | बोलने को प्रेरित करें |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| तिरस्क्रियते | – | उपेक्षा की जाती है |
| पितृव्यः | – | चाचा |
| अवलोकयतः | – | देखते हैं (द्विवचन) |
| कृतास्त्रस्य | – | अस्त्रविद्या से संपन्न व्यक्ति का |
| अलम् | – | निषेधार्थ में तृतीया विभक्ति के साथ |
| आत्मस्तवम् | – | आत्मप्रशंसा |
| सावज्ञम् | – | उपेक्षा करते हुए |
| वाक्शौण्डीर्यम् | – | वाणी की वीरता |
| पदातिः | – | पैदल चलनेवाला |
| उपसर्पतु | – | पास जाओ |
| एहि | – | आओ |
| उत्सिक्तः | – | गर्व से युक्त |
| दर्प–प्रशमनम् | – | घमंड को शान्त करना |
| गृहीतः | – | पकड़ा गया |
| मध्यमः | – | बीच का, यहाँ भीम के लिए |
| तातः | – | पिता |
| प्रहरणम् | – | हथियार |
| व्यपनयतु | – | दूर करें |

## अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –**

(क) भटः कस्य ग्रहणम् अकरोत् ?

(ख) अभिमन्युः कथं गृहीतः आसीत् ?

(ग) भीमसेनेन बृहन्नलया च पृष्टः अभिमन्युः किमर्थम् उत्तरं न ददाति ?

**2. अधोलिखितवाक्येषु प्रकटितभावं चिनुत –**

(क) भोः को नु खल्वेषः ? येन भुजैकनियन्त्रितो बलाधिकेनापि न पीडितः अस्मि।

(विस्मयः, भयम्, जिज्ञासा)

(ख) कथं कथं! अभिमन्युर्नामाहम्। (आत्मप्रशंसा, स्वाभिमानः, दैन्यम्)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



(ग) कथं मां पितृवदाक्रम्य स्त्रीगतां कथां पृच्छसे ? (लज्जा, क्रोधः प्रसन्नता)

(घ) धनुस्तु दुर्बलैः एव गृह्यते मम तु भुजौ एवं प्रहरणम्। (अन्धविश्वासः, शौर्यम्, उत्साहः)

**3. यथास्थानं रिक्तस्थानपूर्तिं कुरुत –**

| | | | |
|---|---|---|---|
| (क) खलु | + एषः | = | .............................. |
| (ख) विभाति | + ................. | = | विभात्युमावेषम् |
| (ग) ................. | + एनम् | = | वाचालयत्वेनम् |
| (घ) त्वमेव | + एनम् | = | .............................. |
| (ङ.) यातु | + ..................... | = | यात्विति |
| (च) ................ | + इति | = | धनञ्जयायेति |

**4. अधोलिखितानि वचनानि कः कं प्रति कथयति –**

| | **कः** | **कं प्रति** |
|---|---|---|
| **यथा** – आर्य, अभिभाषणकौतुहलं मे महत्। | बृहन्नला | भीमसेनम् |
| (क) कथमिदानीं सावज्ञमिव मां हस्यते? | ................. | ................. |
| (ख) अशस्त्रेणेत्यभिधीयताम्। | ................. | ................. |
| (ग) पूज्यतमस्य क्रियतां पूजा। | ................. | ................. |
| (घ) शान्तं पापम्! धनुस्तु दुर्बलैः एव गृह्यते। | ................. | ................. |

**5. अधोलिखितानि स्थूलानि सर्वनामपदानि कस्मै प्रयुक्तानि –**

(क) वाचालयतु <u>एनम्</u> आर्यः।

(ख) किमर्थ <u>तेन</u> पदातिना गृहीतः ?

(ग) कथं न <u>माम्</u> अभिवादयसि।

(घ) <u>मम</u> तु भुजौ एव प्रहरणम्।

(ङ.) अपूर्व इव <u>ते</u> हर्षो ब्रूहि केन विस्मितः ?

**6. (क) अधोलिखितेभ्यः पदेभ्यः उपसर्गान् विचित्य लिखत –**

| | **पदानि** | | **उपसर्गः** |
|---|---|---|---|
| **यथा** – | आसाद्य | – | आ |
| | अवतारितः | – | ...................... |
| | विभाति | – | ...................... |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| अभिभाषय | – | ..................... |
| उद्भूताः | – | ..................... |
| तिरस्क्रियते | – | ..................... |
| प्रहरन्ति | – | ..................... |
| उपसर्पतु | – | ..................... |
| परिरक्षिताः | – | ..................... |
| प्रणमति | – | ..................... |

**(ख) उदाहरणमनुसृत्य कोष्ठकदत्तपदेषु पञ्चमीविभक्तिं प्रयुज्य वाक्यानि पूरयत –**

यथा – श्मशानाद् धनुरादाय अर्जुनः आगतः। (श्मशान)

पाठान् पठित्वा सः ......................... आगतः। (विद्यालय)

......................... पत्राणि पतन्ति। (वृक्ष)

ग ा ......................... निर्गच्छति। (हिमालय)

क्षमा ......................... फलानि आनयति। (आपणम्)

......................... बुद्धिनाशो भवति। (स्मृतिनाश)

## योग्यताविस्तारः

### अन्वय और हिन्दी भावार्थ

**पार्थं पितरमुद्दिश्य मातुलं च जनार्दनम् ।**
**तरुणस्य कृतास्त्रास्य युक्तो युद्धपराजयः।।**

अज्ञातवास में बृहन्नला के रूप में अर्जुन को बहुत समय के बाद पुत्र–मिलन का अवसर प्राप्त हुआ। वह अपने पुत्र से बात करना चाहता है, परन्तु अपने अपहरण से क्षुब्ध अभिमन्यु उनके साथ बात करना ही नहीं चाहता। तब अर्जुन उसे उत्तेजित करने की भावना से इस प्रकार के व्यंग्यात्मक वचन कहते हैं –

तुम्हारे पिता अर्जुन हैं, मामा श्री कृष्ण हैं तथा तुम अस्त्रशस्त्रविद्या से सम्पन्न होने के साथ ही साथ तरुण भी हो, तुम्हारे लिए युद्ध में परास्त होना उचित है।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



षष्ठः पाठः

# सन्तश्रीगहिरागुरुः



श्रीगहिरागुरुः महान् समाजसुधारकः दार्शनिकः तपस्वी च आसीत्। तस्य जन्म प चाधिकएकोनविंशतिशततमे (1905) खीस्ताब्दे रायगढ़मण्डलान्तर्गते गहिराग्रामेऽभवत्। तत्रभवतः पिता श्री बुडकीकँवरमहोदयः सम्पन्नो कृषकः जनजातीयसमूहस्य ग्रामप्रमुखः च आसीत्। मातुर्नाम् श्रीमती सुमित्रा देवी आसीत्। गहिरागुरोः वास्तविकं नाम श्री रामेश्वरकँवरः आसीत्। अन्येषां बालकानां सदृशः तस्य बाल्यकालः प्रकृत्याः सान्निध्ये व्यतीतः।

किशोरावस्थायां रामेश्वरकँवरः गंभीरप्रवृत्तिं प्राप्तवान्। जनजातीयसमूहस्य दुरवस्थां विलोक्य सः भृशं दुःखी आसीत्। तत्रभवान् तान् आत्मनिर्भरकरणार्थं भगीरथप्रयत्नं कृतवान्। एकदा रामेश्वरकँवरः टीपाझरननाम्नि स्थाने अष्टदिनात्मकं अहर्निशं साध् ानामकरोत्। सः जनान् उपदिशति स्म। गहिराग्रामे सः शिवमन्दिरस्य निर्माणमपि कृतवान्। मन्दिरस्य प्रा णे च प्रतिदिनं कीर्तनं करोति स्म। सः रात्रौ भगवद्चिन्तनं कुर्वन् वने इतस्ततश्च भ्रमति स्म। यदा कदा सः समाधिमपि अधिगच्छति स्म। शनैः शनैः तस्य सम्बोधनं गहिरागुरुः अभवत्। सः जनजातीयसमूहस्य नेतृत्वम् अकरोत्। स्वभावतः जनेषु लोकप्रियः अभवत्।

गृहस्थजीवनं व्यतीतं कुर्वन् गहिरागुरुः लोककल्याणे अनवरतं संलग्नः जातः। अनेकेषु स्थानेषु तेन शिक्षासंस्थानानि संस्थापितानि। तेषु संस्कृतपाठशालाः, आश्रमविद्यालयाः महाविद्यालयाःच सन्ति। जीवने शिक्षायाः महत्त्वं निर्विवादम्। तस्मात् कारणात् कालान्तरे सः वंचितसमुदायस्य छात्रेभ्यः अनेकान् छात्रावासान् चापि प्रारभयामास। बहवः जनाः संस्थाश्च तस्य कल्याणकारीकार्यक्रमेषु सहयोगं दत्तवन्तः। तदनन्तरं शासकीयानुदानेन तानि शिक्षासंस्थानानि गतिं प्राप्तानि।

निजसमुदायस्य विकासाय त्रिचत्वारिंशतधिकोत्तरएकोनविंशतिशततमे (1943) खीस्ताब्दे सः गहिराग्रामे सनातनसन्तसमाजनाम संस्थां स्थापयत्। सः वा छति स्म यत् जनाः वैयक्तिकं महत्त्वं विहाय संगठने योजयेयुः।

गुरुमहोदयस्य शिक्षायाः सारः अस्ति – सत्यं, शान्तिः, दया क्षमा च। ततः सः सात्विकजीवनयापनाय उपदेशं दत्तवान्। जनान् स्वच्छतायाः महत्त्वम् अबोधयत्। तस्य व्यक्तित्वे ईदृशं आकर्षणमासीत् यत् जनाः सहजैव प्रभाविताः संजाताः। उत्तरोत्तरं अनुयायीनाम् अभिवर्धनम् अभवत्। गहिरागुरोः ते अनुयायिनः ग्रामे ग्रामे भ्रमन् तस्य विचारस्य प्रसारं प्रचार च कृतवन्तः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



सप्तचत्वारिंशतधिकोत्तर–एकोनविंशतिशततमे (1947) खीस्ताब्दे भारतस्य स्वतंत्रतायाः समये यदा नौवाखलीस्थाने भीषणोपद्रवः अभवत् तदा गहिरागुरुः गान्धिमहोदयेन सह जनान् शांतिव्यवस्थायै न्यवेदयत्। समाजसेवायां तस्य उल्लेखनीययोगदानं नूनं पुरस्करणीयम्।

षडशीत्यधिकोत्तरसप्ताशीत्यधिकोत्तर–एकोनविंशतिशततमे (1986–87) खीस्ताब्दे सः'इन्दिरागाँधीराष्ट्रियसमाजसेवा' इति पुरस्कारेण सम्मानितः जातः। नवम्बरमासे एकविंशत्यां दिना ` षण्णवत्याधिकोत्तर–एकोनविंशतिशततमे (21नवंबर,1996) खीस्ताब्दे गहिरागुरोः देहावसानभवत्। मरणोपरान्ते गुरुमहोदयः मध्यप्रदेशशासनेन 'बिरसामुण्डाआदिवासीसेवा' इत्यनेन पुरस्कारेण सम्मानितः जातः। तत्पश्चात् शहीदवीरनारायणसिंहपुरस्कारं च लब्धवान्। तस्य स्मृतौ छत्तीसगढशासनेन गहिरागुरुपर्यावरणं पुरस्कारं उद्घोषितम्।

तथ्यमिदमस्ति यत् जनानां प्रेम स्नेहं च गहिरागुरवे वास्तविकः पुरस्कारः वर्तते। अद्यापि जनाः तम् आदरपूर्वकं स्मरन्ति।

## शब्दार्थाः

| | | |
|---|---|---|
| एकोनविंशतिः | = | उन्नीस |
| मण्डलान्तर्गते | = | जिला में |
| दुरवस्थाम् | = | खराब स्थिति को |
| विलोक्य | = | देखकर |
| परिभ्रमति स्म | = | घूमते थे |
| अहर्निशम् | = | दिन–रात |
| अवबोधयत् | = | समझाया, बताया |
| षण्णवतिः | = | छियान्बे |

## अभ्यासः

**1. संस्कृतभाषया उत्तरं लिखत –**

(क) गहिरागुरोः जन्म कदा अभवत्?

(ख) गहिरागुरुः कस्य स्थापनामकरोत्?

(ग) केषां दुरवस्थां विलोक्य गुरुः दुःखी आसीत्?

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



(घ) गुरुः जनान् कस्य महत्त्वं अबोधयत्?

(ङ.) छत्तीसगढशासनेन गुरोः स्मृतौ किम् उद्घोषितम् ?

**2 रिक्तस्थानानि पूरयत –**

(क) तस्य मातुर्नाम .................... आसीत्।

(ख) सः .................... नेतृत्वम् अकरोत्।

(ग) गुरुः ...................... अनवरतं संलग्नः जातः।

(घ) तेन .................. संस्थापितानि।

(ङ.) अद्यापि जनाः तम् .................. स्मरन्ति।

**3. अधोलिखितानां पदानां पर्यायपदं पाठात् चित्वा लिखत –**

(क) आचार्यः – ..........................

(ख) अम्बा – ..........................

(ग) गणः – ..........................

(घ) पारितोषिकः – ..........................

(ङ) अवदानम् – ..........................

**4. उदाहरणमनुसृत्य वाक्यानि रचयत –**

यथा– अहं लोककल्याणार्थं कार्यं कर्त्तुम् इच्छामि।

क) ...................................... श्रृणोमि।

ख) ...................................... नमामि।

ग) ...................................... आप्नोमि।

घ) ...................................... गृह्णामि।

ङ.) ...................................... यामि।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**5. स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत –**

क) किशोरावस्थायां रामेश्वरकँवरः गंभीरप्रवृत्तिं प्राप्तवान्।

ख) जीवने शिक्षायाः महत्त्वं निर्विवादम्।

ग) गहिरागुरुः गान्धिमहोदयेन सह जनान् शांतिव्यवस्थायै न्यवेदयत्।

घ) सः जनजातीयसमूहस्य नेतृत्वम् अकरोत्।

ड.) अद्यापि जनाः तम् आदरपूर्वकं स्मरन्ति।

**6. पाठस्य सारांशं प चवाक्यैः लिखत।**

## शिक्षक संदर्शिका

शिक्षक छात्रों को छत्तीसगढ़ की अन्य विभूतियों के जीवन से परिचित कराएँ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



सप्तमः पाठः

# ब्रेललिपिः

*ब्रेललिपि का आविष्कार लुई ब्रेल ने किया था। फ्रांस देश के कूपरवे शहर में 4 जनवरी, 1809 को उनका जन्म हुआ था। शुरुआती तीन सालों तक लुई देख सकते थे। एक दिन उनके पिता बाहर गए थे। वे घोड़ों पर बैठने की चमड़े की जीन बनाते थे। उनका चमड़े को काटने–छेदने का औजार घर पर था। उसी में एक नुकीला सूजा था। खेल–खेल में लुई उससे चमड़े पर छेद करने की कोशिश कर रहे थे। सूजा फिसला और लुई की एक आँख में जा लगा। फिर चोट का असर दूसरी आँख तक फैल गया। लुई के पिता ने लुई के लिए एक पतली छड़ी बना दी। धीरे–धीरे लुई ने छड़ी की मदद से टटोलकर चलना सीख लिया। वे छूकर, सूँघकर, सुनकर चीजों को पहचान लेते थे। थोड़े दिनों बाद उन्हें पेरिस शहर के नेत्रहीन बच्चों के एक स्कूल में दाखिला मिल गया। शाम को लुई ने संगीत और पियानो बजाना सीखना शुरू किया। उन दिनों नेत्रहीन बच्चों के लिए किताब बनाने के कई प्रयास हो रहे थे। कागज की पट्टी पर छेद करके एक अनोखी लिपि खोजी गई। कागज को पलटकर उभरी हुई बिंदियों को छूकर पढ़ा जा सकता था। उसको बेहतर बनाने के काम में लुई जुट गए। लुई ने फ्रेंच भाषा की रोमन लिपि के सभी 26 अक्षरों के उभरी हुई 6 बिंदियोंवाले नमूने बना डाले। उन बिंदियों को छूकर पढ़ना–लिखना संभव था। यही लिपि ब्रेललिपि नाम से प्रसिद्ध हुई। 6 जनवरी, 1852 को लुई ब्रेल का देहांत हुआ, लेकिन आज तक ब्रेललिपि काम में आती है। ब्रेललिपि में किताबें छपती हैं। कम्प्यूटर आने के बाद से उस पर पढ़ना–लिखना और अधिक आसान हो गया है। प्रस्तुत पाठ में आए नीलेश जैसे बच्चों की विशेष आवश्यकता है। वह देख नहीं सकता है। उसको पढ़ने–लिखने के लिए खास उपकरणों की जरूरत होती है। यह उसका अधिकार है। इस पाठ में नीलेश और उसके मित्र धनुष का संवाद है।*

| | | |
|---|---|---|
| धनुषः | – | नमस्कारः! अत्र भवतां स्वागतम्। |
| नीलेशः | – | नमस्कारः। |
| धनुषः | – | आगच्छतु। उपविशतु। भवतः परिचयः किम् ? |
| नीलेश : | – | मम नाम नीलेशः अस्ति। अहं नवम्यां कक्षायां पठितुमागच्छामि।<br>मम मातुः स्थानान्तरणम् अस्मिन् नगरे अभवत्। भवतः परिचयः किम् ? |
| धनुषः | – | मम नाम धनुषः। अहमपि नवम्यां कक्षायां पठामि, किन्तु महदाश्चर्यं<br>भवान् कथं पठति! |
| नीलेशः | – | अहं ब्रेललिपिमाध्यमेन पठनं लेखनं च करोमि। इयं विशिष्टा लिपिः अस्ति। |
| धनुषः | – | अतीव शोभनमस्ति। |
| नीलेशः | – | मित्र!मम पूर्वविद्यालये मम कृते सर्वाणि साधनानि सुलभानि आसन्। |
| धनुषः | – | कानि कानि साधनानि ? |
| नीलेशः | – | विद्यालयं परितः दृष्टिबाधितमित्राणां कृते विशेषः मार्गः निर्मितः। |


Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



धनुषः – अयं मार्गः कथं लाभप्रदः ?

नीलेशः – मित्र! अहं स्वकीयेन दण्डसाहाय्येन संस्पृश्य सर्वत्र गमनागमनं करोमि।



धनुषः – मित्र! स्वकीयां कक्षां भवान् कथं जानाति ?

नीलेशः – द्वारमध्ये ब्रेललिप्या कक्षायाः संख्या लिखिता।

धनुषः – तेन किं भवति ?

नीलेशः – तं स्पर्शं कृत्वा जानाम्यहम्।

धनुषः – किं तव पुस्तकानि अपि ब्रेललिप्याम् उपलब्धानि सन्ति ?

नीलेशः – आम्। विद्यालये एकः स  णकः अपि मम मित्रम्।

धनुषः – तेन किम् भवति ?

नीलेशः – सङ्.गणके एका विशिष्टा सुविधा वर्तते। मम वचनं श्रुत्वा स  णकः लिखितुं शक्नोति।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



धनुषः — भवतः वृत्तान्तं श्रुत्वा दृष्ट्वा च अहमपि स्फूर्तिम् अनुभवामि। एतादृशानि साधनानि सर्वेभ्यः दृष्टिबाधितेभ्यः सुलभानि भवन्तु।

नीलेशः — आम्! धनुष !

धनुषः — अस्माकं विद्यालये विविधोपकरणानि न सन्ति।

नीलेशः — ततः किं कर्त्तव्यम् ?

धनुषः — वयं सर्वे छात्राः आवेदनं कुर्याम यत् अस्माकं विद्यालये समुचिता व्यवस्था भवेत्। तदैव अस्माकं मित्राणां विशेषावश्यकतायाः पूर्तिः भविष्यति।

नीलेशः — उत्तमः विचारः तव।

## अभ्यासः

**1. रिक्तस्थानानि पूरयत –**

(क) मम ...................... स्थानान्तरणम् अस्मिन् नगरे अभवत्।

(ख) विद्यालयं ........................ विशेषः मार्गः निर्मितः।

(ग) द्वारमध्ये ................... कक्षायाः संख्या लिखिता।

(घ) ........................ अपि मम मित्रम् ।

(ङ.) विद्यालये समुचिता ........................ भवेत्।

**2. संस्कृतभाषया उत्तरत –**

(क) नीलेशः केन माध्यमेन पठति ?

(ख) स णकः किं करोति ?

(ग) धनुषः कथं मित्रस्य सहायतां करोति ?

(घ) किं तव विद्यालये नीलेशस्य शिक्षार्थं व्यवस्था अस्ति ?

(ङ.) ततः किं कर्त्तव्यम् ?

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**3. स्तम्भमेलनं कुरुत –**

| **'अ'** | | **'ब'** |
|---|---|---|
| पठितुम् | – | क्त |
| स्पृष्ट्वा | – | तुमुन् |
| पठनम् | – | क्त्वा |
| कृतवान् | – | ल्युट् |
| गतः | – | क्तवतु |

**4. पाठात् चित्वा उपसर्गयुक्तशब्दं लिखत –**

यथा – आगच्छतु ........................................

........................................ ........................................

........................................ ........................................

**5. अधोलिखितानां शब्दानां विलोमपदं लिखत –**

(क) शोभनम् – ........................

(ख) उपलब्धानि – ........................

(ग) मित्रम् – ........................

(घ) सुलभानि – ........................

(ङ.) स्फूर्तिम् – ........................

**6. अधोलिखितानां प्रश्नानाम् उत्तराणि मातृभाषया लिखत –**

(क) ब्रेललिपिः कीदृशी भवति ?

(ख) तव दृष्टिबाधितं मित्रम् अस्ति ?

(ग) ब्रेललिप्याम् पुस्तकानि कुत्र उपलब्धानि भवन्ति ?

(घ) त्वं स णकं जानासि ?

(ङ.) विद्यालये कीदृशी व्यवस्था भवेत् ?

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



अष्टमः पाठः

# सिकतासेतुः

*प्रस्तुत नाट्यांश सोमदेव द्वारा रचित कथासरित्सागर के सप्तम लम्बक (अध्याय) पर आधारित है। यहाँ तपोबल से विद्या पाने के लिए प्रयत्नशील तपोदत्त नामक एक बालक की कथा का वर्णन है। उसके समुचित मार्गदर्शन के लिए वेष बदलकर इंद्र उसके पास आते हैं और पास ही गंगा में बालू से सेतुनिर्माण के कार्य में लग जाते हैं। उन्हें वैसा करते देख तपोदत्त उनका उपहास करता हुआ कहता है– 'अरे'! किसलिए गंगा के जल में व्यर्थ ही बालू से पुल बनाने का प्रयत्न कर रहे हो ?' इंद्र उन्हें उत्तर देते हैं – यदि पढ़ने, सुनने और अक्षरों की लिपि के अभ्यास के बिना तुम विद्या पा सकते हो तो बालू से पुल बनाना भी संभव है। इंद्र के अभिप्राय को जानकर तपोदत्त तपस्या करना छोड़कर गुरुजनों के मार्गदर्शन में विद्या का ठीक–ठीक अभ्यास करने के लिए गुरुकुल चला जाता है।*

(ततः प्रविशति तपस्यारतः तपोदत्तः)

तपोदत्तः – अहमस्मि तपोदत्तः। बाल्ये पितृचरणैः क्लेश्यमानोऽपि विद्यां नाधीतवानस्मि।

तस्मात् सर्वैः कुटुम्बिभिः मित्रैः ज्ञातिजनैश्च गर्हितोऽभवम्। (ऊर्ध्वं निःश्वस्य)

हा विधे! किमिदम्मया कृतम् ? कीदृशी दुर्बुद्धिरासीत्तदा! एतदपि न चिन्तितं

यत् – **परिधानैरलङ्कारैर्भूषितोऽपि न शोभते।**
**नरो निर्मणिभोगीव सभायां यदि वा गृहे।।1।।**

(किञ्चिद् विमृश्य)

भवतु, किमेतेन ? दिवसे मार्गभ्रान्तः सन्ध्यां यावद् यदि गृहमुपैति तदपि वरम्। नाऽसौ भ्रान्तो मन्यते। एष इदानीं तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽस्मि।

(जलोच्छलनध्वनिः श्रूयते)

अये कुतोऽयं कल्लोलोच्छलनध्वनिः? महामत्स्यो मकरो वा भवेत्। पश्यामि तावत्।

(पुरुषमेकं सिकताभिः सेतुनिर्माण–प्रयासं कुर्वाणं दृष्ट्वा सहासम्)

हन्त! नास्त्यभावो जगति मूर्खाणाम्! तीव्रप्रवाहायां नद्यां मूढोऽयं सिकताभिः सेतुं निर्मातुं प्रयतते! (साट्टहासं पार्श्वमुपेत्य)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



भो महाशय! किमिदं विधीयते! अलमलं तव श्रमेण। पश्य,

**रामो बबन्ध यं सेतुं शिलाभिर्मकरालये।**
**विदधद् बालुकाभिस्तं यासि त्वमतिरामताम् ।।2।।**



चिन्तय तावत्। सिकताभिः क्वचित्सेतुः कर्तुं युज्यते ?

पुरुषः – भोस्तपस्विन्! कथं मामुपरुणत्सि। प्रयत्नेन किं न सिद्धं भवति ? कावश्यकता शिलानाम् ? सिकताभिरेव सेतुं करिष्यामि स्वसंकल्पदृढतया।

तपोदत्तः – आश्यर्चम्! सिकताभिरेव सेतुं करिष्यसि ? सिकता जलप्रवाहे स्थास्यन्ति किम् ? भवता चिन्तितं न वा ?

पुरुषः – (सोत्प्रासम्) चिन्तितं चिन्तितम्। सम्यक् चिन्तितम्। नाहं सोपानमार्गेर्ट्टमधिरोढुं विश्वसिमि। समुत्प्लुत्यैव गन्तुं क्षमोऽस्मि।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



तपोदत्तः – (सव्यंग्यम्) साधु साधु! आ जनेयमप्यतिक्रामसि!

पुरुषः – (सविमर्शम्) कोऽत्र सन्देहः ? किं च,

**विना लिप्यक्षरज्ञानं तपोभिरेव केवलम्।**
**यदि विद्या वशे स्युस्ते, सेतुरेष तथा मम।।3।।**

तपोदत्तः – (सवैलक्ष्यम् आत्मगतम्)

अये! मामेवोद्दिश्य भद्रपुरुषोऽयम् अधिक्षिपति! नूनं सत्यमत्र पश्यामि। अक्षरज्ञानं विनैव वैदुष्यमवाप्तुम् अभिलषामि! तदियं भगवत्याः शारदाया अवमानना। गुरुगृहं गत्वैव विद्याभ्यासो मया करणीयः। पुरुषार्थैरेव लक्ष्यं प्राप्यते।

(प्रकाशम्)

भो नरोत्तम! नाऽहं जाने यत् कोऽस्ति भवान्। परन्तु भवि : उन्मीलितं मे नयनयुगलम्। तपोमात्रेण विद्यामवाप्तुं प्रयतमानोऽहमपि सिकताभिरेव सेतुनिर्माणप्रयासं करोमि। तदिदानीं विद्याध्ययनाय गुरुकुलमेव गच्छामि।

(सप्रणामं गच्छति)

## शब्दार्थाः

| | | |
|---|---|---|
| सिकता | – | रेत |
| सेतुः | – | पुल |
| तपस्यारतः | – | तपस्या में लीन |
| पितृचरणैः | – | पिताजी के द्वारा |
| क्लेश्यमानः | – | व्याकुल किया जाता हुआ |
| अधीतवान् | – | पढ़ा |
| कुटुम्बिभिः | – | कुटुम्बियों द्वारा |
| ज्ञातिजनैः | – | बन्धु–बान्धवों द्वारा |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| गर्हितः | – | अपमानित |
| निःश्वस्य | – | लम्बी साँस लेकर |
| दुर्बुद्धिः | – | दुष्ट बुद्धिवाला |
| परिधानैः | – | कपड़ों से, पहनावों से |
| मार्गभ्रान्तः | – | राह से भटका हुआ |
| उपैति | – | जाता है, समीप जाता है |
| तपश्चर्यया | – | तपस्या के द्वारा |
| जलोच्छलनध्वनिः | – | पानी के उछलने की आवाज |
| कल्लोलोच्छलनध्वनिः | – | तरंगों के उछलने की ध्वनि |
| कुर्वाणम् | – | करते हुए |
| सहासम् | – | हँसते हुए |
| सोत्प्रासम् | – | खिल्ली उड़ाते हुए, चुटकी लेते हुए |
| साट्टहासम् | – | जोर से हँसकर |
| अट्टम् | – | अटारी को |
| अधिरोढुम् | – | चढ़ने के लिए |
| उपरुणत्सि | – | रोकते हो |
| v k जनेयम् | – | अ जनिपुत्र हनुमान् को |
| सविमर्शम् | – | सोच विचार कर |
| सवैलक्ष्यम् | – | लज्जापूर्वक |
| वैदुष्यम् | – | विद्वत्ता |
| उन्मीलितम् | – | खोल दी |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –**

(क) अनधीतः तपोदत्तः कैः गर्हितोऽभवत् ?

(ख) तपोदत्तः केन प्रकारेण विद्यामवाप्तुं प्रवृत्तोऽभवत् ?

(ग) तपोदत्तः पुरुषस्य कां चेष्टां दृष्ट्वा अहसत् ?

(घ) तपोमात्रेण विद्यां प्राप्तुं तस्य प्रयासः कीदृशः कथितः ?

(ङ) अन्ते तपोदत्तः विद्याग्रहणाय कुत्र गतः ?

**2. भिन्नवर्गीयं पदं चिनुत –**

**यथा** – अधिरोढुम्, गन्तुम्, सेतुम्, निर्मातुम् = सेतुम्

(क) निःश्वस्य, चिन्तय, विमृश्य, उपेत्य = ....................

(ख) विश्वसिमि, पश्यामि, करिष्यामि, अभिलषामि = ....................

(ग) तपोभिः, दुर्बुद्धिः, सिकताभिः, कुटुम्बिभिः = ....................

**3. (क) अधोलिखितानि कथनानि कः कं प्रति कथयति ?**

| कथनानि | | कः | कम् |
|---|---|---|---|
| (1) हा विधे! किमिदं मया कृतम् ? | – | .................... | ............... |
| (2) भो महाशय! किमिदं विधीयते ? | – | .................... | ............... |
| (3) भोस्तपस्विन्! कथं माम् उपरुणत्सि ? | – | .................... | ............... |
| (4) सिकताः जलप्रवाहे स्थास्यन्ति किम् ? | – | .................... | ............... |
| (5) नाहं जाने कोऽस्ति भवान् ? | – | .................... | ............... |

**(ख) रेखांकितानि सर्वनामपदानि कस्मै प्रयुक्तानि ?**

(1) अलमलं <u>तव</u> श्रमेण।

(2) न <u>अहं</u> सोपानमार्गैरट्टमधिरोढुं विश्वसिमि।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



(3) चिन्तितं भवता न वा।

(4) गुरुगृहं गत्वैव विद्याभ्यासो मया करणीयः।

(5) भवद्भिः उन्मीलितं मे नयनयुगलम्।

**4. स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत –**

(क) तपोदत्तः तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽस्ति।

(ख) तपोदत्तः कुटुम्बिभिः मित्रैः गर्हितः अभवत्।

(ग) पुरुषः नद्यां सिकताभिः सेतुं निर्मातुं प्रयतते।

(घ) तपोदत्तः अक्षरज्ञानं विनैव वैदुष्यमवाप्तुम् अभिलषति।

(ङ.) तपोदत्तः विद्याध्ययनाय गुरुकुलम् अगच्छत्।

(च) गुरुगृहं गत्वैव विद्याभ्यासः करणीयः।

**5. उदाहरणमनुसृत्य अधोलिखितविग्रहपदानां समस्तपदानि लिखत –**

| **विग्रहपदानि** | **समस्तपदानि** |
|---|---|
| **यथा** – संकल्पस्य सातत्येन | संकल्पसातत्येन |
| (क) अक्षराणां ज्ञानम् | ............................................ |
| (ख) सिकतायाः सेतुः | ............................................ |
| (ग) पितुः चरणैः | ............................................ |
| (घ) गुरोः गृहम् | ............................................ |
| (ङ) विद्यायाः अभ्यासः | ............................................ |

**6. उदाहरणमनुसृत्य अधोलिखितानां समस्तपदानां विग्रहं कुरुत–**

| **समस्तपदानि** | **विग्रहपदानि** |
|---|---|
| **यथा** – नयनयुगलम् | नयनयोः युगलम् |
| (क) जलप्रवाहे | ............................................ |
| (ख) तपश्चर्या | ............................................ |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



(ग) जलोच्छ्लनध्वनिः ..........................................................

(ङ) सेतुनिर्माणप्रयासः ..........................................................

**7. उदाहरणमनुसृत्य कोष्ठकात् पदम् आदाय नूतनवाक्यद्वयं रचयत –**

(क) **यथा** – अलं चिन्तया ('अलम्' योगे तृतीया)

(1) .................. .................. (भय)

(2) .................. .................. (कोलाहल)

(ख) **यथा** – माम् अनु सः गच्छति।

(1) ............. ............. ............. ............. (गृह)

(2) ............. ............. ............. ............. (पर्वत)

Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com



नवमः पाठः

# रघुवंशम्

*महाकवि कालिदासकृत महाकाव्य 'रघुवंशम्' के प्रथम सर्ग से यह पाठ लिया गया है। इस काव्य में राजा दिलीप से लेकर अग्निवर्ण तक इक्ष्वाकुवंशीय राजाओं का वर्णन किया गया है।*



वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।। 1।।

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव।। 2।।

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ।। 3।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।। 4।।

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः।। 5।।

द्वेष्योपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ।। 6।।

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।। 7।।

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया।
तौ दम्पती वशिष्ठस्य गुरोर्जग्मतुराश्रमम्।। 8।।

हैय वीनमादाय घोषवृद्धानुपस्थितान्।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम्।। 9।।

## शब्दार्थाः

| | | |
|---|---|---|
| वैवस्वतः | – | वैवस्वत (सूर्य पुत्र) |
| मनीषिणाम् | – | विद्वानों का, विद्वानों में |
| महीक्षिताम् | – | राजाओं का, राजाओं में |
| प्रणवः | – | ओंकार |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| छन्दसाम् | – | वेदमन्त्रों का, वेदमन्त्रों में |
| तदन्वये | – | उसके वंश में |
| शुद्धिमति | – | पवित्र बुद्धिवाले में |
| प्रसूतः | – | उत्पन्न हुआ |
| राजेन्दुः | – | राजाओं में चन्द्रमा |
| क्षीरनिधौ | – | समुद्र में |
| आकारसदृशप्रज्ञः | – | आकार के अनुरूप बुद्धिवाला |
| आगमः | – | शास्त्रज्ञान |
| भूत्यर्थम् | – | सुखसमृद्धि के लिए |
| बलिम् | – | कर |
| उत्स्रष्टुम् | – | देने के लिए, छोड़ने के लिए (उत् + सृज् + तुमुन्) |
| विनयाधानात् | = | शिक्षा देने के कारण |
| द्वेष्यः | – | द्वेष करने योग्य, शत्रु |
| उरगक्षता | – | साँप द्वारा काटी गई |
| दाक्षिण्यरुढेन | – | अधिक निपुण होने के कारण |
| अध्वरस्य | – | यज्ञ की |
| अभ्यर्च्य | – | पूजा करके |
| विधातारम् | – | ब्रह्म को |
| प्रयतौ | – | पवित्र |
| जग्मतुः | = | चले गए |
| हैय वीनम् | – | मक्खन को |
| घोषवृद्धान् | – | वृद्ध ग्वालों से |
| शाखिनाम् | – | वृक्षों का (शाखिन्, षष्ठी बहु.) |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –**

(क) महीक्षिताम् आद्यः कः आसीत् ?

(ख) वैवस्वतस्य मनोः वंशे कः प्रसूतः ?

(ग) स प्रजाभ्यो बलिं किमर्थं गृहीतवान् ?

(घ) दिलीपस्य पत्नी का आसीत् ?

(ङ) तौ दम्पती कुत्र जग्मतुः ?

**2. उपयुक्तं पदं चित्वा रिक्तस्थानानि पूरयत –**

(क) आकारदृशप्रज्ञः ..............................सदृशागमः । (विद्यया, शीलेन, प्रज्ञया)

(ख) सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं.............................. । (रविः कविः हविः)

(ग) अथाभ्यर्च्य.............................. प्रयतौ पुत्रकाम्यया। (विधातारम्, गणाधीशम्)

(घ) .............................. धेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् (नाम, भाग)

**3. उदाहरणमनुसृत्य वाक्यानि रचयत ।**

**यथा** – दीपायै केवलं फलं रोचते।

दुष्टः, आदाय, त्याज्य, दम्पती, प्रजानाम्

**4. सन्धिं/विच्छेदं कुरुत ।**

| | |
|---|---|
| मनुर्नाम | = |
| राजेन्दुरिन्दुः | = |
| सुदक्षिणेत्यासीत् | = |
| पितरस्तासाम् | = |
| शिष्टः + तस्य + आर्तस्य | = |
| अध्वरस्य + एव | = |
| गुरोः +जग्मतुः + आश्रमम् | = |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**5. अधोलिखितानां पदानां पर्यायपदं लिखत ।**

(क) इन्दुः ..................

(ख) प्रज्ञा ..................

(ग) दुष्टः ..................

(घ) पत्नी ..................

(ङ.) अध्वरः ..................

(च) विधाता ..................

**6. श्लोकानां भावार्थं मातृभाषया लिखत।**

## योग्यताविस्तारः

### अन्वय और हिन्दी भावार्थ

**1. मनीषिणां माननीयः वैवस्वतः नाम मनुः छन्दसां प्रणवः इव महीक्षिताम् आद्यः आसीत्।**

विद्वानों के सम्माननीय वैवस्वत मनु वेदों में ऊँकार के समान राजाओं में प्रथम थे।

**2. शुद्धिमति तदन्वये शुद्धिमत्तरः दिलीप इति राजेन्द्र क्षीरनिधौ इन्दुः इव प्रसूतः।**

वैवस्वत मनु के उस पवित्र वंश में अति पवित्र दिलीप नामक श्रेष्ठ राजा क्षीरसागर में चन्द्रमा के समान उत्पन्न हुए।

**3. आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः आगमैः सदृशारम्भः आरम्भसदृशोदयः।**

वे आकार के अनुरूप बुद्धिवाले, बुद्धि के समान शास्त्र का अभ्यास करनेवाले, शास्त्राभ्यास के अनुसार उद्योग करनेवाले और उद्योग के अनुसार फल को प्राप्त करनेवाले थे।

**4. स प्रज्ञानाम् एवं भूत्यर्थं ताभ्यः बलिम् अग्रहीत्, हि रविः सहस्र गुणम् उत्स्रष्टुं रसम् आदत्ते।**

प्रजा के कल्याण के लिए ही उनसे कर लेते थे जैसे सूर्य हजार गुणा जल बरसाने के लिए (पृथ्वी से) रस खींचते हैं।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**5. विनयाधानात् रक्षणात् भरणात् अपि सः प्रजानां पिता (अभूत्) तासां पितरः केवलं जन्महेतवः।**

शिक्षा देने से, रक्षा करने से, पालन–पोषण करने से वे प्रजा के पिता थे। उनके पिता तो केवल जन्मदाता थे।

**6. शिष्टः द्वेष्यः अपि आर्तस्य औषधं यथा तस्य सम्मतः। दुष्टः प्रियः अपि उरगक्षता अंगुलि इव त्याज्य आसीत्।**

सज्जन शत्रु भी रोगी को औषधि के समान उनको प्रिय था और दुष्ट प्रिय होने पर भी साँप से डँसी हुई अंगुलि की तरह त्याज्य था।

**7. तस्य मगधवंशजा दाक्षिण्यरूढेन नाम्ना सुदक्षिणा इति अध्वरस्य दक्षिणा इव पत्नी आसीत्।**

मगध वंश में उत्पन्न, अधिक निपुण होने के कारण सुदक्षिणा नाम वाली 'दक्षिणा' नाम की यज्ञ की स्त्री के समान दिलीप की स्त्री थी।

**8. अथ पुत्रकाम्यया विधातारम् अभ्यर्च्य प्रयतौ तौ दंपती गुरोः वसिष्ठस्य आश्रमं जग्मतुः।**

उसके बाद पुत्र की इच्छा से ब्रह्मा की पूजा करके वे दोनों पवित्र पति–पत्नी कुलगुरु वसिष्ठ की आश्रम की ओर चले।

**9. हैयंगवीनम् आदाय उपस्थितान् घोषवृद्धान् वन्यानां मार्गशाखिनां नामधेयानि पृच्छन्तौ (तौ जग्मतुः)।**

गाय का ताजा मक्खन लेकर उपस्थित हुए वृद्ध गोपों से जंगली वृक्षों के नाम आदि पूछते हुए (वे चले)।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



दशमः पाठः

# विश्वबन्धुत्वम्

विश्वस्य सर्वान् जनान् प्रति बन्धुत्वस्य भावः एव विश्वबन्धुत्वम् इति कथ्यते। शान्तिमयाय जीवनाय विश्वबन्धुत्वस्य भावना नितरां महत्त्वं भजते। सर्वजनहितं सर्वजनसुखं च बन्धुत्वं विना न सम्भवति। विश्वबन्धुत्वम् एव दृष्टौ निधाय केनापि मनीषिणा निर्दिष्टम् –

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**

साम्प्रतम् अखिले संसारे अशान्तेः हिंसायाः च साम्राज्यं व्याप्तम् अस्ति। येन साधनसम्पन्नः अपि मानवः सुखस्य स्थाने दुःखमेव अनुभवति। यद्यपि ज्ञानबलेन मानवः इदानीं आकाशे विचरितुं, सागरान् सन्तर्तुं, विश्वभ्रमणं कर्तुं चन्द्रादिग्रहेषु च गन्तुं समर्थः अस्ति, तथापि परस्परं सम्बन्धानां कटुता अशान्तिः चैव दृश्यते। विगतयोः द्वयोः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



विश्वयुद्धयोः विनाशलीलां सर्वे जानन्ति एव। इदानीं तृतीयस्य युद्धस्य सम्भावना सर्वदा मानवजातिम् आक्रान्तं करोति। आयुधानाम् अविवेकपूर्णः संग्रहः, नाभिकीयशक्तेः परीक्षणम् देशानां प्रतिद्वंद्विता च विश्वं नाशं प्रति नयन्ति। अतएव विश्वबन्धुत्वम् अपरिहार्यम्। मानवः मानवं प्रति बन्धुवत् आचरणं कुर्यात्। एकः देशः अन्येन देशेन सह बन्धुतायाः व्यवहारं कुर्यात्। सबलाः देशाः दुर्बलेषु देशेषु आक्रमणं न कुर्युः। स्वार्थस्य लोलुपतायाः महत्वाकाङ्क्षायाः च स्थाने परस्परं सहयोगस्य प्रसारो भवेत्।

अधुना संसारस्य कतिपयेषु महाद्वीपेषु परस्परं शत्रुतायाः हिंसायाश्च साम्राज्यं व्याप्तमस्ति। अखिलं विश्वं विविधाभिः समस्याभिः पीडितम् अस्ति। जीवने शान्तिः दुर्लभा जाता। कुत्रचित् श्वेताश्वेतयोः कारणात् कलहो वर्तते। कुत्रचित् धर्मभेदः विद्वेषस्य कारणमस्ति। कुत्रचित् तु वर्गभेदः, लिंगभेदः जातिभेदः वा। स्वार्थाय, अहंकाराय, शक्तिवर्धनाय चापि देशाः संघर्षरताः सन्ति। अनेन मानवः एव मानवहन्ता स जातः।

तथापि शान्तिस्थापनार्थम् अनेके देशाः अनेकाः संस्थाः च प्रयासरताः सन्ति। यथा संयुक्तराष्ट्रसंघः, गुटनिरपेक्षान्दोलनं जनान्दोलनं च विश्वबन्धुत्वं स्थापयितुं सततं प्रयत्नं कुर्वन्ति। इदम् अस्माकमपि दायित्वम् इति स्मरणीयम्। संसारे सर्वेषु मानवेषु समानं रक्तं प्रवहति। सर्वे समानाः सन्ति। अस्माकं कामना अस्ति –

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।**

## शब्दार्थाः

| | | |
|---|---|---|
| भद्राणि | = | कल्याण |
| मनीषिणा | = | विद्वान द्वारा |
| प्रेम्णः | = | प्रेम का |
| साम्प्रतम् | = | इस समय |
| सन्तर्तुम् | = | पार करने के लिए |
| भ्रान्ता | = | भटके हुए |
| हन्ता | = | मारने वाला |
| स जातः | = | हो गया |
| निरामयाः | = | रोग रहित |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत –**

(क) साम्प्रतं संसारे किं व्याप्तम् अस्ति ?

(ख) आयुधानां संग्रहः विश्वं कुत्र नयति ?

(ग) विद्वेषस्य कारणानि कानि कानि सन्ति ?

(घ) संसारे किमर्थं विश्वबन्धुत्वस्य आवश्यकता अस्ति ?

(ड.) शान्तये के प्रयत्नशीलाः सन्ति ?

**2. निम्नलिखितानां शब्दानां लिंगं विभक्तिं वचनं च लिखत ।**

(क) शान्तिमयाय

(ख) सम्बन्धानाम्

(ग) समस्याभिः

(घ) कुटुम्बकम्

(ड.) सुखिनः

**3. निम्नलिखितानां शब्दानां धातुं लकारं पुरुषं वचनं च लिखत ।**

(क) सम्भवति

(ख) दृश्यते

(ग) वर्तते

(घ) कुर्यात्

(ड.) प्रवहति

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**4. वर्गेषु भिन्नप्रकृतिकं पदं चिनुत ।** **उत्तराणि**

(क) भावः, भवति, लाभः, संघः, उद्योगः । = ...............

(ख) प्रति, विश्वस्मिन्, देशे, अखिले, संसारे । = ...............

(ग) रक्तम्, रुधिरम्, जलम्, शोणितम्, लोहितम्। = ...............

(घ) वसुधा, वसुन्धरा, धरा, जरा, पृथ्वी। = ...............

(ङ.) स्मरणीयम्, पठनीयम्, करणीयम्, आदरणीयम्, जयम्। = ...............

**5. कोष्ठान्तर्गतानां पदानाम् उपयुक्तविभक्तिप्रयोगेन अनुच्छेदं पूरयत ।**

समाजे ..............(अनुशासन) उल्लंघनं विकासस्य प्रक्रियां बाधते। न केवलं समाजस्य ..............(कल्याण), अपितु निजहिताय अपि अस्य आवश्यकता अस्ति। यदा कोऽपि .................(देश) अनुशासनस्य अवमाननां करोति तदा व्यवस्थायां ............................(दुष्प्रभाव) परिलक्ष्यते। परिणामस्वरूपं सर्वत्र अराजकतायाः अव्यवस्थायाश्च ..............................(राज्य) भवति। कुत्रापि न शान्तिः भवति न च ...................(प्रगति) अनुशासनं विना। इदमेव अस्माकं ....................(जीवन) केन्द्रस्थमस्ति। इदं सहयोगस्य ..................(भावना) जनयति। .................(एकता) स्थापयति। निस्संदेहम् .................(इदम्) सर्वत्र पालयितव्यम्।

**6. संस्कृतभाषया अनुवादं कुरुत –**

(क) अहिंसा परम धर्म है।

(ख) सब लोग समान हैं।

(ग) भेदभाव करना गलत है।

(घ) बन्धुत्व सुख का कारण है।

(घ) हम सबको शान्ति के लिए प्रयास करना चाहिए।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



एकादशः पाठः

# भारतीवसन्तगीतिः

*प्रस्तुत गीत आधुनिक संस्कृत–साहित्य के प्रख्यात कवि पं. जानकी वल्लभ शास्त्री की रचना 'काकली' नामक गीतसंग्रह से संकलित है। इसमें सरस्वती की वन्दना करते हुए कामना की गई है कि हे सरस्वती! ऐसी वीणा बजाओ, जिससे मधुर मंजरियों से पीत पंक्तिवाले आम के वृक्ष, कोयल का कूजन, वायु का धीरे–धीरे बहना, अमराइयों में काले भ्रमरों का गुञ्जार और नदियों का (लीला के साथ बहता हुआ) जल, वसन्त ऋतु में मोहक हो उठे। स्वाधीनता संग्राम की पृष्ठभूमि में लिखी गई यह गीतिका एक नवीन चेतना का आवाहन करती है तथा ऐसे वीणास्वर की परिकल्पना करती है जो स्वाधीनता प्राप्ति के लिए जनसमुदाय को प्रेरित करे ।*

निनादय नवीनामये वाणि! वीणाम्
मृदुं गाय गीतिं ललित–नीति–लीनाम्।
मधुर–मञ्जरी–पिञ्जरी–भूत–मालाः
वसन्ते लसन्तीह सरसा रसालाः
कलापाः ललित–कोकिला–काकलीनाम् ।।1।।
निनादय ......।।

वहति मन्दमन्दं सनीरे समीरे
कलिन्दात्मजायास्सवानीरतीरे,
नतां प तिमालोक्य मधुमाधवीनाम् ।।2।।
निनादय ......।।

ललित–पल्लवे पादपे पुष्पपु जे
मलयमारुतोच्चुम्बिते म जुकु जे,
स्वनन्तीन्ततिम्प्रेक्ष्य मलिनामलीनाम् ।।3।।
निनादय ......।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**लतानां नितान्तं सुमं शान्तिशीलम्**
**चलेदुच्छलेत्कान्तसलिलं सलीलम्,**
**तवाकर्ण्य वीणामदीनां नदीनाम् ।।4।।**
**निनादय ......।।**

## शब्दार्थाः

| | | |
|---|---|---|
| निनादय | – | गुंजित करो,बजाओ |
| मृदुम् | – | कोमल |
| गाय | – | गााओ |
| ललित–नीति–लीनाम् | – | सुन्दर नीति में लीन |
| म जरी | – | आम्रपुष्प |
| पि जरीभूतमालाः | – | पीले वर्ण से युक्त पंक्तियाँ |
| लसन्ति | – | सुशोभित हो रही हैं |
| इह | – | यहाँ |
| सरसाः | – | मधुर |
| रसालाः | – | आम के पेड़ |
| कलापाः | – | समूह |
| काकली | – | कोयल की आवाज |
| सनीरे | – | जल से पूर्ण |
| समीरे | – | हवा में |
| कलिन्दात्मजायाः | – | यमुना नदी के |
| सवानीरतीरे | – | बेंत की लता से युक्त तट पर |
| नताम् | – | झुकी हुई |
| मधुमाधवीनाम् | – | मधुर मालती लताओं का |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| ललितपल्लवे | – | सुंदर, मन को आकर्षित करनेवाले पत्ते |
| पुष्पपु जे | – | पुष्पों के समूह पर |
| मलयमारुतोच्चुम्बिते | – | चन्दन वृक्ष की सुगन्धित वायु से स्पर्श किए गए |
| म जुकु जे | – | सुन्दर लताओं से आच्छादित स्थान |
| स्वनन्तीम् | – | ध्वनि करती हुई |
| ततिम् | – | पंक्ति को, समूह को |
| प्रेक्ष्य | – | देखकर |
| मलिनाम् | – | मलिन |
| अलीनाम् | – | भ्रमरों के |
| सुमम् | – | पुष्प को |
| शान्तिशीलम् | – | शान्ति से युक्त |
| उच्छलेत् | – | उच्छलित हो उठे |
| कान्तसलिलम् | – | स्वच्छ जल |
| सलीलम् | – | खेल–खेल के साथ |
| आकर्ण्य | – | सुनकर |

## अभ्यासः

**1. अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत –**

(क) कविः वीणापाणिं किं कथयति ?

(ख) वसन्ते के लसन्ति ?

(ग) मधुमाधवीनां पंक्तिः कीदृशी अस्ति ?

(घ) अलीनां ततिः कीदृशी अस्ति ?

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**2.'क' स्तम्भे पदानि, 'ख' स्तम्भे तेषां पर्यायपदानि दत्तानि। तानि चित्वा पदानां समक्षे लिखत–**

| ^d * Lr EHk% | ^[ k* Lr EHk% | | ^x * mÙkj kf. k |
|---|---|---|---|
| (क) सरस्वती | (1) तीरे | = | ............... |
| (ख) आम्रम् | (2) अलीनाम् | = | ............... |
| (ग) पवनः | (3) समीरः | = | ............... |
| (घ) तटे | (4) वाणी | = | ............... |
| (ङ.) भ्रमराणाम् | (5) रसालः | = | ............... |

**3. अधोलिखतानि पदानि प्रयुज्य संस्कृतभाषया वाक्यरचनां कुरुत –**

(क) निनादय

(ख) मन्दमन्दम्

(ग) मारुतः

(घ) सलिलम्

(ङ.) सुमनः

**4. प्रथमश्लोकस्य आशयं मातृभाषया लिखत –**

**5. अधोलिखितपदानां विलोमपदानि लिखत –**

(क) कठोरम् – ....................................

(ख) कटु – ....................................

(ग) शीघ्रम् – ....................................

(घ) प्राचीनम् – ....................................

(ड्. नीरसः – ....................................

**7. पाठेऽस्मिन् वीणायाः चर्चा अस्ति। अन्येषां प चवाद्ययन्त्राणां चित्रं रचयित्वा तेषां नामानि लिखत।**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## योग्यताविस्तारः

### अन्वय और हिन्दी भावार्थ

**अये वाणि! नवीनां वीणां निनादय। ललितनीतिलीनां गीतिं मृदुं गाय।**

हे वाणी! नवीन वीणा को बजाओ, सुन्दर नीतियों से परिपूर्ण गीत का मधुर गान करो।

**इहवसन्ते मधुरम जरीपि जरीभूतमालाः सरसाः रसालाः लसन्ति। ललित–कोकिलाकाकलीनां कलापाः (विलसन्ति)। अये वाणि ! नवीनां वीणां निनादय।**

इस वसन्त में मधुर मंजरियों से पीली हो गई सरस आम के वृक्षों की माला सुशोभित हो रही है। मनोहर काकली (बोली, कूक) वाली कोकिलों के समूह सुन्दर लग रहे हैं। हे वाणी! नवीन वीणा को बजाओ।

**कलिन्दात्मजायाः सवानीरतीरे सनीरे समीरे मन्दमन्दं वहति (सति) माधुमाधवीनां नतां**

**पि तम् अवलोक्य अये वाणि! नवीनां वीणां निनादय।**

यमुना के वेतस लताओं से घिरे तट पर जल बिन्दुओं से पूरित वायु के मन्द मन्द बहने पर फूलों से झुकी हुई मधुमाधवी लता को देखकर, हे वाणी! नवीन वीणा को बजाओ।

**ललितपल्लवे पादपे पुष्पपु जे म जुकु जे मलय–मारुतोच्चुम्बिते स्वनन्तीम् अलीनां मलिनां ततिं प्रेक्ष्य अये वाणि! नवीनां वीणां निनादय।**

मलयपवन से स्पृष्ट ललित पल्लवों वाले वृक्षों, पुष्पपुंजों तथा सुन्दर कुंजों पर काले भौंरों की गुंजार करती हुई पंक्ति को देखकर, हे वाणी नवीन वीणा को बजाओ।

**तव अदीनां वीणाम् आकर्ण्य लतानां नितान्तं शान्तिशीलं सुमं चलेत् नदीनां कान्तसलिलं सलीलम् उच्छलेत्। अये वाणि! नवीनां वीणां निनादय।**

तुम्हारी ओजस्विनी वीणा को सुनकर लताओं के नितान्त शान्त सुमन हिल उठें, नदियों का

मनोहर जल क्रीडा करता हुआ उछल पड़े। हे वाणी! नवीन वीणा को बजाओ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## द्वादशः पाठः

# लौहतुला


*प्रस्तुत पाठ विष्णुशर्मा द्वारा रचित 'प चतन्त्रम्' नामक कथाग्रन्थ के 'मित्रभेद' नामक तन्त्र से संकलित है। इसमें विदेश से लौटकर जीर्णधन नामक व्यापारी अपनी धरोहर (तराजू) को सेठ से माँगता है। 'तराजू चूहे खा गए हैं' ऐसा सुनकर जीर्णधन उसके पुत्र को स्नान के बहाने नदी तट पर ले जाकर गुफा में छिपा देता है। सेठ द्वारा अपने पुत्र के विषय में पूछने पर जीर्णधन कहता है कि 'पुत्र को बाज उठा ले गया है।' इस प्रकार विवाद करते हुए दोनों न्यायालय पहुँचते हैं जहाँ धर्माधिकारी उन्हें समुचित न्याय प्रदान करते हैं।*

आसीत् कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः। स च विभवक्षयाद्देशान्तर गन्तुमिच्छन् व्यचिन्तयत्। तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनःस्वपुरमागत्य तं श्रेष्ठिनमुवाच–''भोः श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला।''

स आह–''भोः! नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता'' इति।

जीर्णधन आह–''भोः श्रेष्ठिन्! नास्ति दोषस्ते, यदि मूषकैर्भक्षितेति। ईदृगेवायं संसारः। न कि चिदत्र शाश्वतमस्ति। परमहं नद्यां स्नानार्थं गमिष्यामि। तत् त्वमात्मीयं शिशुमेनं धनदेवनामानं मया सह स्नानोपकरणहस्तं प्रेषय'' इति।

स श्रेष्ठी स्वपुत्रमुवाच–''वत्स! पितृव्योऽयं तव, स्नानार्थं यास्यति, तद् गम्यतामनेन सार्धम्'' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



अथासौ वणिक्शिशुः स्नानोपकरणमादाय प्रहृष्टमनाः तेन अभ्यागतेन सह प्रस्थितः। तथानुष्ठिते स वणिक् स्नात्वा तं शिशुं गिरिगुहायां प्रक्षिप्य, तद्द्वारं बृहच्छिलयाच्छाद्य सत्वरं गृहमागतः।

पृष्टश्च तेन वणिजा–"भोः! अभ्यागत! कथ्यतां कुत्र मे शिशुर्यस्त्वया सह नदीं गतः"? इति।

स आह–"नदीतटात्स श्येनेन हृतः" इति।

श्रेष्ठ्याह – "मिथ्यावादिन्! किं क्वचित् श्येनो बालं हर्तुं शक्नोति? तत् समर्पय मे सुतम् अन्यथा राजकुले निवेदयिष्यामि।" इति।

स आह–"भोः सत्यवादिन्! यथा श्येनो बालं न नयति, तथा मूषका अपि लौहघटितां तुलां न भक्षयन्ति। तदर्पय मे तुलाम् यदि दारकेण प्रयोजनम्।" इति।

एवं विवदमानौ तौ द्वावपि राजकुलं गतौ। तत्र श्रेष्ठी तारस्वरेण प्रोवाच–भोः! अब्रह्मण्यम्! अब्रह्मण्यम्! मम शिशुरनेन चौरेणापहृतः" इति।

अथ धर्माधिकारिणस्तमूचुः –"भोः! समर्पयतां श्रेष्ठिसुतः"।

स आह –"किं करोमि? पश्यतो मे नदीतटाच्छ्येनेन अपहृतः शिशुः"। इति।

तच्छ्रुत्वा ते प्रोचुः – भोः! न सत्यमभिहितं भवता किं श्येनः शिशुं हर्तुं समर्थो भवति?

स आह – भोः भोः! श्रूयतां मद्वचः–

**तुलां लौहसहस्त्रस्य यत्रा खादन्ति मूषकाः।**
**राजन्तत्र हरेच्छ्येनो बालकं, नात्र संशयः।।**

ते प्रोचुः –"कथमेतत्"।

ततः स श्रेष्ठी सभ्यानामग्रे आदितः सर्वं वृत्तान्तं निवेदयामास। ततस्तैर्विहस्य द्वावपि तौ परस्परं संबोध्य तुला–शिशु–प्रदानेन सन्तोषितौ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शब्दार्थाः

| | | |
|---|---|---|
| अधिष्ठाने | – | स्थान पर |
| विभवक्षयात् | – | धन के अभाव के कारण |
| लौहघटिता तुला | – | लोहे से बनी हुई तराजू |
| निक्षेपः | – | धरोहर |
| भ्रान्त्वा | – | पर्यटन करके |
| त्वदीया | – | तुम्हारी |
| भवदीया | – | आपकी |
| ईदृक् | – | ऐसा ही |
| एनम् | – | इसे |
| आत्मीयम् | – | अपना |
| स्नानोपकरणहस्तम् | – | स्नान की सामग्री से युक्त हाथवाला |
| वणिजा | – | व्यापारी के द्वारा |
| श्येनः | – | बाज |
| अब्रह्मण्यम् | – | घोर अन्याय |
| समर्पय | – | दो |
| विवदमानौ | – | झगड़ा करते हुए |
| तारस्वरेण | – | जोर से |
| ऊचुः | – | बोले |
| अभिहितम् | – | कहा गया |
| मद्वचः | – | मेरी बातें |
| आदितः | – | आरम्भ से |
| निवेदयामास | – | निवेदन किया |
| विहस्य | – | हँसकर |
| संबोध्य | – | समझा बुझा कर |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत।**

क) कुत्र गन्तुं वणिक्पुत्रः व्यचिन्तयत्?

ख) स्वतुलां याचमानं जीर्णधनं श्रेष्ठी किम् अकथयत्?

ग) जीर्णधनः गिरिगुहाद्वारं कया आच्छाद्य गृहमागतः?

घ) स्नानानन्तरं पुत्रविषये पृष्टः वणिक्पुत्रः श्रेष्ठिनं किम् उवाच?

ड.) धर्माधिकारिभिः जीर्णधनश्रेष्ठिनौ कथं सन्तोषितौ?

**2. स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत।**

क) **जीर्णधनः** विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्।

ख) श्रेष्ठिनः शिशुः स्नानोपकरणमादाय **अभ्यागतेन** सह प्रस्थितः।

ग) **श्रेष्ठी** उच्चस्वरेण उवाच – भोः अब्रह्ममण्यम् अब्रह्ममण्यम्।

घ) सभ्यैः तौ **परस्परं** संबोध्य तुला–शिशु–प्रदानेन सन्तोषितौ।

**3. अधोलखितानां श्लोकानाम् अपूर्णोऽन्वयः प्रदत्तः पाठमाधृत्य तं पूरयत।**

क) यत्र देशे अथवा स्थाने...............भोगाः भुक्ता ..............विभवहीनः यः........सः पुरुषाधमः।

ख) राजन्! यत्रा लौहसहस्रस्य ................ मूषकाः ................ तत्र श्येनः ................ हरेत् अत्र संशयः न।

**4. तत्पदं रेखाि तं कुरुत यत्र।**

क) ल्यप् प्रत्ययः नास्ति

विहस्य, लौहसहस्रस्य, संबोध्य, आदाय

ख) यत्र द्वितीया विभक्तिः नास्ति

श्रेष्ठिनम्, स्नानोपकरणम्, सत्त्वरम्, कार्यकारणम्

ग) यत्र षष्ठी विभक्तिः नास्ति

पश्यतः, प्रहृष्टमनाः, श्रेष्ठिनः सभ्यानाम्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**5. सन्धिना सन्धिविच्छेदेन वा रिक्तस्थानानि पूरयत।**

क) श्रेष्ठ्याह = .............. + आह

ख) ............... = द्वौ + अपि

ग) पुरुषोपार्जिता = पुरुष + ...............

घ) ............... = यथा + इच्छया

ङ.) स्नानोपकरणम् = ..............+ उपकरणम्

च) ............... = स्नान + अर्थम्

**6. समस्तपदं विग्रहं वा लिखत–**

| **विग्रहः** | | **समस्तपदम्** |
|---|---|---|
| क) स्नानस्य उपकरणम् | = | .............. |
| ख) ............... ............... | = | गिरिगुहायाम् |
| ग) धर्मस्य अधिकारी | = | .............. |
| घ) .............. ............... | = | विभवहीनाः |

Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com



**त्रयोदशः पाठः**

# भ्रान्तो बालकः

*प्रस्तुत पाठ 'संस्कृत प्रौढपाठावलिः' नामक ग्रंथ से सम्पादित कर लिया गया है। इस कथा में एक ऐसे बालक का चित्रण है, जिसका मन अध्ययन की अपेक्षा खेल–कूद में लगा रहता है। यहाँ तक कि वह खेलने के लिए पशु–पक्षियों तक का आवाहन करता है किन्तु कोई उसके साथ खेलने के लिए तैयार नहीं होता। इससे वह बहुत निराश होता है। अन्ततः उसे बोध होता है कि सभी अपने–अपने कार्यों में व्यस्त हैं। केवल वही बिना किसी काम के इधर–उधर घूमता रहता है। वह निश्चय करता है कि अब व्यर्थ में समय गँवाना छोड़कर अपना कार्य करेगा।*



भ्रान्तः कश्चन बालः पाठशालागमनवेलायां क्रीडितुं निर्जगाम। किन्तु तेन सह केलिभिः कालं क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्। यतस्ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणा बभूवुः। तन्द्रालुर्बालो लज्जया तेषां दृष्टिपथमपि परिहरन्नेकाकी किमप्युद्यानं प्रविवेश।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



स चिन्तयामास– विरमन्त्वेते वराकाः पुस्तकदासाः। अहं पुनरात्मानं विनोदयिष्यामि। ननु भूयो द्रक्ष्यामि क्रुद्धस्य उपाध्यायस्य मुखम्। सन्त्वेते निष्कुटवासिन एव प्राणिनो मम वयस्या इति।

अथ स पुष्पोद्यानं व्रजन्तं मधुकरं दृष्ट्वा तं क्रीडाहेतोरा यत्। स द्विस्त्रिरस्या ानमेव न मानयामास। ततो भूयो भूयः हठमाचरति बाले सोऽगायत्–वयं हि मधुसंग्रहव्यग्रा इति।

तदा स बालः 'कृतमनेन मिथ्यागर्वितेन कीटेन' इत्यन्यतो दत्तदृष्टिश्चटकमेकं च च्वा तृणशलाकादिकम् आददानमपश्यत्। उवाच च – ''अयि चटकपोत! मानुषस्य मम मित्रं भविष्यसि ? एहि क्रीडावः। त्यज शुष्कमेतत् तृणम् स्वादूनि भक्ष्यकवलानि ते दास्यामि'' इति। स तु 'नीडः कार्यो बटद्रुशाखायां तद्यामि कार्येण' इत्युक्त्वा स्वकर्मव्यग्रो बभूव।

तदा खिन्नो बालकः एते पक्षिणो मानुषेषु नोपगच्छन्ति। तदन्वेषयाम्यपरं मानुषोचितं विनोदयितारमिति परिक्रम्य पलायमानं कमपि श्वानमवालोकयत्। प्रीतो बालस्तमित्थं सम्बोधयामास रे मानुषाणां मित्र! किं पर्यटसि अस्मिन् निदाघदिवसे? आश्रयस्वेदं प्रच्छायशीतलं तरुमूलम्। अहमपि क्रीडासहायं त्वामेवानुरूपं पश्यामीति। कुक्कुरः प्रत्याह –

**यो मां पुत्रप्रीत्या पोषयति स्वामिनो गृहे तस्य**
**रक्षानियोगकरणान्न मया भ्रष्टव्यमीषदपि।। इति।**

सर्वैरेवं निषिद्धः स बालो विघ्नितमनोरथः सन्–'कथमस्मिन् जगति प्रत्येकं स्व–स्वकृत्ये निमग्नो भवति। न कोऽप्यहमिव वृथा कालक्षेपं सहते। नम एतेभ्यः यैर्मे तन्द्रालुतायां कुत्सा समापादिता। अथ स्वोचितमहमपि करोमि इति विचार्य त्वरितं पाठशालामुपजगाम।

ततः प्रभृति स विद्याव्यसनी भूत्वा महतीं वैदुषीं प्रथां सम्पदं च लेभे।

## शब्दार्थाः

| | | |
|---|---|---|
| भ्रान्तः | – | भ्रमित |
| क्रीडितुम् | – | खेलने के लिए |
| निर्जगाम | – | निकल गया |
| केलिभिः | – | खेल द्वारा |
| कालं क्षेप्तुम् | – | समय बिताने के लिए |
| त्वरमाणाः | – | शीघ्रता करते हुए |
| तन्द्रालुः | – | आलसी |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| दृष्टिपथम् | – | निगाह |
| चिन्तयामास | – | सोचा |
| पुस्तकदासाः | – | पुस्तकों के गुलाम |
| उपाध्यायस्य | – | गुरु के |
| निष्कुटवासिनः | – | वृक्ष के कोटर में रहने वाले |
| क्रीडाहेतोः | – | खेलने के निमित्त |
| आ ानम् | – | बुलावा |
| हठमाचरति | – | हठ करने पर |
| मधुसंग्रहव्यग्राः | – | पुष्प के रस के संग्रह में लगे |
| भूयो भूयः | – | बार–बार |
| मिथ्यागर्वितेन | – | झूठे गर्व वाले |
| चटकम् | – | चिड़िया |
| च च्वा | – | चोंच से |
| आददानम् | – | ग्रहण करते हुए को |
| स्वादूनि | – | स्वादयुक्त |
| भक्ष्यकवलानि | – | खाने के लिए उपयुक्त कौर |
| स्वकर्मव्यग्रः | – | अपने कार्यों में संलग्न |
| अन्वेषयामि | – | खोजता हूँ |
| विनोदयितारम् | – | मनोरंजन करने वाले को |
| पलायमानम् | – | भागते हुए |
| अवलोकयत् | – | देखा |
| बटद्रुशाखायां | – | बरगद के पेड़ की शाखा पर |
| सम्बोधयामास | – | सम्बोधित किया |
| निदाघदिवसे | – | गर्मी के दिन में |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| केलीसहायम् | – | खेल में सहयोगी |
| अनुरूपम् | – | उपयुक्त |
| कुक्कुरः | – | कुत्ता |
| रक्षानियोगकरणात् | – | रक्षा के कार्य में लगे होने से |
| भ्रष्टव्यम् | – | हटना चाहिए |
| ईषदपि | – | थोड़ा–सा भी |
| निषिद्धः | – | मना किया गया |
| विघ्नितमनोरथः | – | टूटी इच्छाओं वाला |
| कालक्षेपम् | – | समय बिताना |
| तन्द्रालुतायाम् | – | आलस्य में |
| कुत्सा | – | घृणाभाव |
| विद्याव्यसनी | – | विद्या में रत रहने वाला |
| प्रथाम् | – | ख्याति, प्रसिद्धि |

## अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत।**

(क) बालः कदा क्रीडितुं निर्जगाम ?

(ख) बालस्य मित्राणि किमर्थं त्वरमाणा बभूवुः ?

¼x½e/kq j %cky d L; v k ानं केन कारणेन न अमन्यत ?

(घ) बालकः कीदृशं चटकम् अपश्यत् ?

(ङ.) बालकः चटकाय क्रीडनार्थं कीदृशं लोभं दत्तवान् ?

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



(च) खिन्नः बालकः श्वानं किम् अकथयत् ?

(छ) विघ्नितमनोरथः बालः किम् अचिन्तयत् ?

**2. निम्नलिखितस्य श्लोकस्य भावार्थं मातृभाषया लिखत।**

योो मां पुत्रप्रीत्या पोषयति स्वामिनो गृहे तस्य।

रक्षानियोगकरणान्न मया भ्रष्टव्यमीषदपि।।

**3. ''भ्रान्तो बालः'' इति कथाया सारांशं मातृभाषया लिखत।**

**4. स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत।**

(क) **स्वादूनि** भक्ष्यकवलानि ते दास्यामि।

(ख) **चटकः** स्वकर्मणि व्यग्रः आसीत्।

(ग) कुक्कुरः **मानुषाणां** मित्रम् अस्ति।

(घ) स महतीं **वैदुषीं** लब्धवान्।

(ङ.) **रक्षानियोगकरणात्** मया न भ्रष्टव्यम् इति।

**5. 'क' स्तम्भे समस्तपदानि 'ख' स्तम्भे च तेषां विग्रहः दत्तानि, तानि यथासमक्षं लिखत।**

| क | ख | | |
|---|---|---|---|
| (क) दृष्टिपथम् | (1) पुष्पाणाम् उद्यानम् | = | .............. |
| (ख) पुस्तकदासाः | (2) विद्यायाः व्यसनी | = | .............. |
| (ग) विद्याव्यसनी | (3) दृष्टेः पन्थाः | = | .............. |
| (घ) पुष्पोद्यानम् | (4) पुस्तकानां दासाः | = | .............. |

**6. अधोलिखितेषु पदयुग्मेषुं एकं विशेष्यपदम् अपर च विशेषणपदम्। विशेषणपदम् विशेष्यपदं च पृथक्–पृथक् चित्वा लिखत –**

| | | विशेषणम् | विशेष्यम् |
|---|---|---|---|
| (1) खिन्नः बालः | – | .............. | .............. |
| (2) पलायमानं श्वानम् | – | .............. | .............. |
| (3) प्रीतः बालकः | – | .............. | .............. |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



(4) स्वादूनि भक्ष्यकवलानि – ............... ...............

(5) त्वरमाणाः वयस्याः – ............... ...............

**7. कोष्ठकगतेषु पदेषु सप्तमीविभक्तेः प्रयोगं कृत्वा रिक्तस्थानपूर्तिं कुरुत।**

(1) बालः ............... क्रीडितुं निर्जगाम। (पाठशालागमनवेला)

(2) ............... जगति प्रत्येकं स्वकृत्ये निमग्नो भवति। (इदम्)

(3) खगः ............... नीडं करोति। (शाखा)

(4) अस्मिन् ............... किमर्थं पर्यटसि ? (निदाघदिवस)

(5) ............... हिमालयः उच्चतमः। (नग)

## योग्यताविस्तारः

**क्रिया के निम्नलिखित रूपों को ध्यानपूर्वक देखें समझें व अभ्यास करें –**

पठति – पढ़ता/पढ़ती है, पाठयति–पढ़ाता/पढ़ाती है, पाठयामास–पढ़ाया

**यथा** – सः पुस्तकं पठति।

शिक्षकः छात्रान् पाठयति।

आचार्यः वेदान् पाठयामास।

इसी प्रकार कुछ अन्य रूप भी प्रस्तुत हैं–

| | | |
|---|---|---|
| बोधति | बोधयति | बोधयामास |
| करोति | कारयति | कारयामास |
| लिखति | लेखयति | लेखयामास |
| गच्छति | गमयति | गमयामास |
| हसति | हासयति | हासयामास |
| श्रृणोति | श्रावयति | श्रावयामास |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# व्याकरण खण्ड

किसी भी विकासशील भाषा में एकरूपता बनाए रखने के लिए सुसम्बद्ध एवं प्रामाणिक व्याकरण की आवश्यकता होती है। यह हमें भाषा का शुद्ध उपयोग – बोलना, लिखना, पढ़ना आदि सिखाता है। संस्कृत भाषा एवं साहित्य का अध्यापन करने के लिए संस्कृत–व्याकरण का ज्ञान आवश्यक है। संस्कृत व्याकरण में पाणिनि रचित 'अष्टाध्यायी' सर्वमान्य एवं प्रामाणिक व्याकरण ग्रन्थ है।

संस्कृत भाषा का वैज्ञानिक दृष्टि से बहुत महत्त्व है। कालक्रम में संस्कृत का स्वरूप भी बदला है। इसीलिए जो प्राचीन वेदों की भाषा है उसमें और बाद की लौकिक संस्कृत यानी साहित्यिक ग्रंथों में प्रयुक्त संस्कृत में भी अंतर दिखता है। लौकिक संस्कृत के प्रयोग में भी समय के साथ अंतर आया है, लेकिन वह कमोबेश पाणिनि के व्याकरण का पालन करता है।

संस्कृत की ध्वनियों को स्वर (Vowel) और व्यंजन (Consonant) में बाँटा जाता है।

**स्वर वर्ण –** संस्कृत वर्णमाला में 13 स्वर हैं। यथा– अ,आ,इ,ई,उ,ऊ,ऋ,ॠ,ऌ,ए,ऐ,ओ,औ। स्वर वह ध्वनि है जिसके उच्चारण में वायु बिना रुकावट के मुँह से बाहर निकलती है। स्वर के तीन भेद हैं –

**ह्रस्व** – जिनको बोलने में एक मात्रा का समय लगता है उसे ह्रस्व कहते हैं। जैसे – अ, इ, उ, ऋ।

**दीर्घ** – जिनको बोलने में दो मात्रा का समय लगता है उसे दीर्घ कहते हैं। जैसे – आ, ई, ऊ, ॠ।

**प्लुत** – जिनको बोलने में तीन मात्रा का समय लगता है उसे प्लुत कहते हैं। इसका प्रयोग प्रायः पुकारने में होता है। जैसे – हे राम.......3, हे प्रभो...... 3 !

**व्य जन वर्ण –** व्य जन के उच्चारण में वायु के मुँह से निकलने में थोड़ी रुकावट आती है। इसके लिए स्वर की सहायता लेनी पड़ती है। वर्णमाला में 33 व्य जन वर्ण हैं।

इसके अलावा वर्णों को कई अन्य आधारों पर भी वर्गीकृत किया जाता है। सबसे अधिक प्रचलित है व्य जनों का उच्चारण के स्थान (Points of articulation) के आधार पर वर्गीकरण। यह मुख्यतः 5 प्रकार का बताया गया है – कंठ्य, तालव्य, मूर्धन्य, दन्त्य और ओष्ठ्य।

**कंठ्य –** अ, आ, कवर्ग (क् ख् ग् घ् ङ्), ह् और विसर्ग कंठ से बोले जाते हैं। इसलिए इन्हें कंठ्य कहते हैं।

**तालव्य –** इ, ई, चवर्ग (च् छ् ज् झ् ञ्), य् और श् तालु से बोले जाते हैं। इसलिए इन्हें तालव्य कहते हैं।

**मूर्धन्य** – ऋ, दीर्घ ऋ, टवर्ग (ट् ठ् ड् ढ् ण्), र् और ष् मूर्धा से बोले जाते हैं। इसलिए इन्हें मूर्धन्य कहते हैं।

**दन्त्य –** लृ, तवर्ग (त् थ् द् ध् न्), ल् और स् दाँत से बोले जाते हैं। इसलिए इन्हें दन्त्य कहते हैं।

Downloaded from https:// www.studiestoday.com

